पान, सुपारी, जनै,
अगरबत्ती
पञ्चामृत—१
अबीर, केशर—१

फल अथवा हुनु
पर्छ
अर्घ्य
पक्वान्न नैवेद्य

———

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवग्रह-मण्डल

ग्रहाणां दक्षिणे पार्श्वे, ईश्वरादि नव अधिदेवतानां पूजनम्



CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वामपार्श्वे अग्न्यादि नव ग्रत्यधिदेवता–पूजनम् ।
ततः पञ्च लोकपाला दिक्पालादयश्च पूजनीयाः ।

ग्रहस्थितिः—मध्ये तु भास्करं विद्यात्, शशिनं पूर्व–दक्षिणे ।
भौमन्तु दक्षिणे विद्यात्, ईशाने तु बुधं यजेत् ॥ १ ॥
उत्तरेण गुरुं विद्यात्, पूर्वे तु भार्गवं यजेत् ।
रवि–पुत्रं पश्चिमे तु राहुः पश्चिम–दक्षिणे ॥ २ ॥
वायुकोणे यजेत् केतुं, रंजितैर्धान्यतण्डुलैः ॥

ग्रहसमिधा—अर्कः पलाशः खादीरः अपामार्गोऽथ पिप्पलः ।
औदम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ १ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

अथ ग्रहशान्तिः

श्रीगणेशाय नमः ॥ अत्र ग्रहार्चनविषये विशेषम्–स्कन्दपुराणे–सुखोप-विष्टं गार्ग्यंतु कौशिकः परिपृच्छति ॥ निखिलां ग्रहशान्ति मे भगवन् वक्तु-मर्हसि॥ १॥ गार्ग्य उवाच ॥ देव–दानव–गन्धर्वा यक्ष–राक्षस–किन्नराः ॥ पीडिता ग्रहपिडाभिः किम् पुनर्भुवि मानवाः ॥२॥ शनैश्चरेण सौदासो नरमांसे नियो-जितः ॥ राहुणा पीडितो राजा नलो भ्रान्तो महीतले ॥३॥ अंगारक–विरोधेन रामो राष्ट्राद्विवासितः ॥ अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ॥४॥ रविणा सप्तमस्थेन हतो राजा सुयोधनः ॥ पाण्डवा बुधपीडायां विकर्मणि नियोजिताः ॥ षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ॥ एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कर्मारम्भः ॥ आदौ कर्मपात्रं कुर्य्यात् ॥ ततः पूजोपकरण द्रव्या-ण्यादाय ग्रहमख मण्डपे समागत्य–अपवित्रः पवित्रो वा ॐ पुण्डरीकाक्षाय नमः, इति, कर्म्मपात्रोदकेन कुशैरभिषिञ्चेत् । ततः अपसर्पन्तु० इति, भूतोपसा-रणम्, ततो विधिना विहित ग्रहमण्डप पश्चिमभागे वा चोत्तराभिमुखो वा शुद्धासने समुपविश्य सङ्कल्पं कुर्य्यात् । कर्मपात्रोदकमादाय । ॐ तत्स-द्विष्णुः ३, पूर्वसंकल्पं समुच्चार्य देशकालौ स्मृत्वा अमुक शर्माऽहं मम अमुक कर्मणि निर्विघ्नता–सिद्ध्यर्थं नवग्रहमखेणाऽहं यक्ष्ये ॥ इति संकल्पः ॥ ग्रह मण्डपे पूजोपक णानि समानीय दीप कलश गणेशादीन् यथास्थाने संस्थाप्य, कर्म्मसाक्षिणं दीपं यथाविधि सम्पूज्य, श्रीगणेशपूजनम् । संकल्पः ॐ अद्येत्यादि देश कालौ स्मृत्वा नवग्रह मख निर्विघ्नतासिद्धये आदौ गण-पतिपूजनमहं करिष्ये, इति संकल्य ॥ प्रार्थना, ॐ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥१॥ अतः आवा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हनासनपाद्यादि विधिना यथालब्धोपचारैः सुसम्पूज्य, बद्धाञ्जलिः इति पठेत्—
ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ॥
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमोनमस्ते ॥
इति गणपति-पूजनम् ॥

अथ पुण्याहवाचनम् कार्य्यम् । पुष्पवस्त्रादिभिः चतुरः ब्राह्मणान् संपूज्य,
ॐ अद्येत्यादि० मम गृहे वाक्यं संयोज्य, ॐ पुण्याहं भवन्तो ब्रुवन्तु, इति त्रिः
श्रावयेत् यजमानः ॥ ब्राह्मणाश्च, ॐ पुण्याहम् ३ इति त्रिः प्रतिवचनं कुर्युः ॥
एवम्,—ॐ स्वस्ति भवन्तो ब्रुवन्तु इति त्रिः ॥ ॐ स्वस्तिः, इति त्रिः प्रतिब्रुवन्तु,
॥ एवम्—ॐ ऋद्धिर्भवन्तो ब्रुवन्तु, इति त्रिः । ॐ ऋद्ध्यन्ताम्, ३ त्रिः प्रति० ॥
एवम्—ॐ वृद्धिं भवन्तो ब्रवन्तु इति त्रिः ॥ ॐ वृद्ध्यन्ताम् ३ इति त्रि प्रति० ॥४॥
एवम्—ॐ कल्याणं भवन्तो ब्रवन्तु ३ इति त्रिः प्रतिब्रुयुः ॥ ६ ॥ एवम्—ॐ

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

श्रियम् भवन्तो ब्रुवन्तु इतिः त्रिः ॥ ॐ शान्ति ३ ॥ ब्राह्मणाः, प्रतिब्रूयुः ॥७॥ इति पुण्याहवाचनम् ॥

अथ ग्रहस्थापनपूजनम् ॥ तत्रादौ संकल्पम् ॥ ॐ अद्येह इत्यादि देशकालौ स्मृत्वा, ममामुककर्मणः परिपूर्णतासिद्धये सर्वदोषोपशमनार्थं सूर्यादि नवग्रहदेवतास्थापनपूजनमहं करिष्ये ॥ ततो विनियोगपूर्वकस्थापनम् ।

अथ ब्राह्मणवरणम् ॥ प्रथममाचार्य्यवरणम् ॥ उदङ्मुखमाचार्यं वरयेत् । चन्दनाक्षतवस्त्रादिभिः सम्पूज्य, अद्यामुकगोत्रम्, अमुकशर्माणं ब्राह्मणमेभिश्चन्दनाक्षतपुष्पवस्त्रादिभिः, नवग्रहमखे आचार्यत्वेन त्वामहं वृणे ॥ ॐ वृतोऽस्मि, इति प्रतिवचनम् ॥ एवं होतारम्, चन्दनवस्त्रादिभिः सम्पूज्य, ॐ अद्यामुकगोत्रं वेदाध्यायिनं शर्म्माणं ब्राह्मणमेभिश्चन्दनवस्त्रादिभिः, अस्मिन्नवग्रहमखे होमकर्मकर्तुं होतृत्वेन वृणे ॥ ॐ वृतोऽस्मि, इति ब्राह्मणः ॥ एवं पुनः, ब्राह्मणं वरयेत् । ॐ अद्यामुकगोत्रममुकवेदाध्यायिनममुकशर्म्माणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवग्रहमखे होमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म कर्तुमेभिश्चन्दन-पुष्पाक्षतवस्त्रादिभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ ॐ वृतोऽस्मि, इतिप्रतिवचनम् ॥ एवं सूक्तजपार्थम्–ब्राह्मणमुपवेश्य चन्दनवस्त्रादिभिः सम्पूज्य ॥ ॐ अद्यामुक गोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दन पुष्पाक्षत वस्त्रादिभिर्जापकत्वेन त्वामहं वृणे ॥ ॐ वृतोऽस्मि इति प्रतिवचनम् ॥ एते वृतब्राह्मणाः स्वगृह्योक्तरित्या यजुर्वैदिकविधिना अग्निस्थापनादिकं कर्य्युः ॥ ॐ यद्देवा देवहेडनमिति परिसमूहनम् ॥ ॐ मानस्तोक इति उपलेपनम् ॥ ॐ त्वावृत्रेष्विन्द्रेति उल्लिख्य ॥ ॐ व्रतंकृणुत व्रतमिति उद्धृत्य ॥ ॐ देवस्यत्वेत्यभ्युद्य ॥ ॐ अग्निर्मुर्धा० इति, अग्निमुपसमाधाय ॥ ॐ समिधाग्निन्दुवस्यत० इति समिधामादध्यात् ॥ ॐ मयिगृह्णामीति अग्नेरभ्युक्षणं कृत्वा ॥ ॐ हिरण्यगर्भ० इति दक्षिणतो ब्रह्मासनम् । ॐ आपोहिष्ठा० इति उत्तरतः प्रणीता, ॐ कयानश्चित्र० इति परिस्तरणम् ॥ ॐपवित्रेस्थो वैष्णव्यौ इति पवित्रे द्वे ॥ ॐइषेत्वा० ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आज्यनिरूपणम् ॥ ॐ त्रातारमिन्द्रमिति स्रुवं प्रतप्य ॥ ॐ अनिसीतोसीति स्रुव-संमार्जनम् ॥ ॐ प्रत्युष्ट रक्षेति पुनः प्रतपनम् ॥ ओं देवस्यत्वासवितुर्व्वः प्रसवऽउत्पुनामित्युपयमनम् ॥ ॐ तदेवाग्निरिति, उत्प्रेक्षणम् ॥ ॐ समिधाग्निमिति समिधादानम् ॥ ॐ भूरसीति पर्य्युक्षणम् ॥ ततो दर्भं गृहित्वा स्रुवेण मूलाहुतयः ॥ ओं प्रजापतये स्वाहा ॥ इन्द्रायः स्वाहा ॥ ॐ अग्नये स्वाहा ॥ ॐ सोमाय स्वाहा ॥ ॐ भूः स्वाहा ॥ ॐ भुवः स्वाहा ॥ ॐ स्वः स्वाहा ॥ इति मूलहोमाहुतयः ॥ एवं वैदिकोऽग्नि-संस्कारः ॥ ततः ईशाने, अव्रणं कलशं स्थापयेत् ॐ भूरसीति भूमिशोधमम्, ॐ धान्यमसीति धान्यस्थापनं कृत्वा तदुपरि कलशं संस्थाप्य, ॐ आजिघ्रकलशमिति जलम् ॥ ॐ व्वरुणस्योत्तम्भनमिति ॥ ॐ याऽओषधीरिति सर्वौषधिः प्रक्षिपेत् ॥ हिरण्यादि द्रव्यम्-पञ्चरत्नम् ॥ ॐ हिरण्यगर्भः समवर्त्ततेति ॥ ॐ याः फलिनीरिति पूगीफलादीनि ॥ ॐ ओषधयः समवेति यवान् । ॐ गन्धद्वारा-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

मिति गन्धम् ॥ ॐ काण्डात्काण्डेति दूर्वा ॥ ॐ स्योनापृथिवीति सप्तमृदः ॥ ॐ अश्वत्थेव० इति पञ्चापल्लवैस्तन्मुखमाच्छाद्य ॥ ॐ बृहस्पतेऽअति० इति वस्त्रद्वयेन कलशं सम्वेष्टय ॥ ॐ तत्त्वायामि ब्रह्मणा वन्दमानेति वरुणमावाह्य पूजयेत् ॥ ततः कलशे गंगादितीर्थान्यावाहयेत् ॥ ॐ सर्वे समुद्राः सरित-स्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरित-क्षयकारकाः ॥ इति कलशं संस्पृश्य, ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥१॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्व्वणः ॥२॥ अङ्गैश्च साहिताः सर्वे कलशं तु समाश्रिताः ॥ ततःप्रार्थना ॥ देवदानवसम्वादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णु नास्वयम् ॥३॥ त्वत्तोये सर्वतीर्थानि देवा सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥४॥ त्वत्प्रसा-दादिमां पूजां कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दादिमां पूजां कर्तुमहं जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव

सर्वदा ॥५॥ इति प्रार्थनां कृत्वा ॥ एवं दीप-कशल--गणेशपूजां सम्पाद्य, ग्रह वेद्यां सन्निकटे स्थित्वा, आचार्य–सहित–ग्रहादीनां स्थापनम् पूजनम् कुर्य्यात् ॥

अथ ग्रहस्थापनपूजनम् ॥ तत्रादौ संकल्पम् ॥ ॐ अद्येह इत्यादि देशकालौ स्मृत्वा, ममामुक -- कर्मणः परिपूर्णता -- सिद्धये सर्व-- दोषोपशमनार्थं सूर्य्यादि नवग्रह देवता स्थापनम् पूजनमहं करिष्ये । पूजनादिकं कुर्य्यात् ॥ ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दो व्याहृतीनां क्रमेण जमदग्नि--भारद्वाज--भृगव ऋषयोऽग्निवार्यः सूर्य्यो देवता दैवी गायत्री दैव्युष्णिक् दैवी बृहत्यश्छन्दांसि सूर्य्याद्यावाहने विनियोगः ॥ ततो नवग्रह--मण्डलमध्ये वर्त्तुले द्वादशाङ्गुल--मण्डले किरीटिनं पद्मारूढं हस्तद्वये पद्मघृतं लोहितवर्णं रक्तवस्त्रधरम् सप्ताऽश्वरथस्थं सप्तार्चिषं प्राङ् मुखं श्रीसूर्य्यं रक्तपुष्पाक्षतैः पूजयेत् ॥ ॐ अग्निन्दूतं पर० ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपगोत्र सूर्य्य इहागच्छ इत्यावाह्य इह तिष्ठ स्थापयित्वा,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतानिपाद्यार्घ्याचमनीयानि० ॐ आकृष्णेन० एतानि रक्त गन्ध पुष्पाक्षता--दीनि धूपदीपादीनि श्रीसूर्य्यनारायणाय नमः ॥१॥ ततः ताग्नेयदले चतुरस्रे चतुर्विंशाङ्गले मण्डले किरीटिनं द्विभुजं वर गदा हस्तं श्वेतवर्णं श्वेत दशा--स्वरथस्थं सोममादित्याभि मुखस्यं श्वेतपुष्पाक्षतैः पूजनम् । ॐ अप्स्वग्ने० ॐ भूभुर्वः स्वः यमुनातीरोद्भव आत्रेय गोत्र भो सोम इहागच्छ, इत्यावाह्य, इहतिष्ठ इति प्रतिष्ठाप्य, आसन पाद्यार्घ्यादि उपचारैः । ॐ इमन्देवा० ॐ सोमाय नमः इति पूजनम् ॥ दक्षिणदले सोमम्--त्रिकोणे त्र्यङ्गले मण्डले किरीटिनं रक्तवर्णं रक्तमाल्याम्बरधरं चतुर्भुजं रक्तपुष्पाक्षतैः । ॐ स्योना पृथिविनोभवेति० ॐ भूर्भुवः स्वः अवन्ति देशोद्भव भारद्वाज गोत्र भौम, इहागच्छ, इत्यावाह्य; इहतिष्ठेतिस्थापयित्वा, ॐ अग्निर्मूर्द्धा० ॐ भौमायनमः पाद्यादिभिः उपचारैः सम्पूज्य ॥२॥ ततः ईशानदले वाणाकारे चतुरङ्गुले किरी--टिनं पीतवर्णं चतुर्भुजं वरखड्ग--वर्म गदाहस्तं सिंहस्थमादित्याभिमुखं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुधं पीत पुष्पाक्षतैः, ॐ उद्–बुद्ध्यस्व० ॐ बुधाय नमः इति पाद्यादि, उपचारैः ॥ ततः, उत्तरदले चतुरस्त्रे षडङ्गु लेमण्डले कीरीटिनं पीतवर्णं पीत–माल्याम्बर धरम् चतुर्भुजं वरचमं वराक्षसूत्रकमंडलु धरमादित्याभिमुखं बृहस्पतिं पतीपुष्पाक्षतैः, ॐ इन्द्र आसान्नेता ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आंगिरस गोत्र बृहस्पते ! इहागच्छ इहातिष्ठ इत्यावाह्य संस्थाप्य ॐ बृहस्पये नमः इतिपूजयेत् ॥५॥ ततः पूर्वदले पञ्चकोणे नवांगुले मंडले किरीटिनं श्वेतवर्णं स्वेत माल्याम्बरधरं चतुर्भुज वराक्ष सूत्र दन्ड कमन्डलु धरमादि–त्याभिमुखं शुक्रं शुक्ल पुष्पाक्षतैः, ॐ शुक्र ज्योतिश्च० ॐ भूर्भुवः भो भोजकट देशोद्भव भार्गवगोत्र शुक्र ईहागच्छ, इहतिष्ठ, इत्यावाह्य प्रतिष्ठाप्य ॐ अन्नात्परिश्रुतः, इतिमन्त्रेण ॐ शुक्राय नमः पूजयेत् ॥६॥ तत पश्चिम दलेधनुषाकारे द्व्यंगुलेमंडले किरीटिनं कृष्णमाल्याम्बर धरं चतुर्भुज वरत्रिशूल धनुर्वाण धरं गृध्रवाहनमादित्याभिमुखं शनिं कृष्ण पुष्पाक्षतैः,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ॐ प्रजापतेन० ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर । इहागच्छ इत्यवाह्य, इहतिष्ठ इति प्रतिष्ठाप्य, ॐ शन्नोदेवी० ॐ शनैश्चराय नमः इतिपूजयेत् ॥७॥ ततो नैर्ऋत्यदले सूर्पाऽकारे द्वादशाङ्गुले किरीटिनं कृष्णवर्णं कृष्णमालाबरम्धरम् करालवदनं चतुर्भुजं वर खड्गचर्मधनुर्धनं सिंहस्थघादित्याभिमुखं राहुं कृष्ण पुष्पक्षतैः ॐ आयङ्गौ० ॐ भूभर्वः स्वः राठि देशोद्भव पैठिनसि गोत्रोद्भव राहो, इहागच्छ, इत्यावाह्य, इह तिष्ठ, इति प्रतिष्ठाप्य, ॐ कयानश्चित्र, ॐ राहवे नमः, इति पूजयेत् ॥८॥ ततो वायव्य मण्डले ध्वजाकारे मण्डले किरीटिनो धुम्रान्द्विभुजान् गदाहस्तान् विवृत-मुखान् केतून्, धुम्रपुष्पाक्षतैः ॐ ब्रह्म यज्ञानम्० ॐ भूर्भुवः स्वः, अन्तर्वेदि समुद्भवः जैमिनिगोत्राः केतवः, इहागच्छत, इत्यवाह्य, इहतिष्ठ, इति प्रतिष्ठाप्य ॐ केतुं कृण्व० केतुभ्यो नमः इति पञ्चोपचारैः पूजायित्वा, धूपदीपादिकं कृत्वा, अधिदेवतादिकं दक्षिणपार्श्वे पूजयेत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथाधिदेवता,--सूर्य्यस्य दक्षिणपार्श्वे ईश्वरम्, ॐ त्र्यम्बकमिति वशिष्ठ ऋषिः रुद्रो देवता अनुष्टुप्छन्दः ईश्वरस्यवाहनपूजनयोर्विनियोगः ॥ ॐ त्र्यम्बकं यजामहे० ॐ भूर्भुवः स्वः ईश्वर इहागच्छ, इह तिष्ठ इत्यावाह्य संस्थाप्य, ॐ ईश्वराय नमः । इति पूजनम् ॥१॥ सोमस्य दक्षिणपार्श्वे— ॐ श्रीश्चते लक्ष्मीश्चेति, उत्तरनारायण ऋषि उमा देवताः त्रिष्टुप्छन्द उमाया आवाहन--पूजनयोर्विनियोगः ॥ ॐ श्रीश्चतेलक्ष्मीश्च० इति, ॐ भूर्भुवः स्व० उमे, इहागच्छ इत्यावह्य इह तिष्ठ इति संस्थाप्य ॐ उमायै नमः इति पू० ॥२॥ ततो भौमस्य दक्षिणपार्श्वे ॐ यदक्रन्द इति भास्कर जमदग्नि दीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दस्यावाहन--पूजनयोर्विनियोगः ॥ ॐ यदक्रन्दः० ॐ भूर्भुवः स्वः स्कन्द ! इहागच्छ इहतिष्ठ इत्यावह्य, संस्थाप्य ॐ स्कन्दाय नमः इतिपूजयेत् ॥३॥ बुधस्य दक्षिणपार्श्वे ॐ विष्णोरराट मिति, उत्तर्य ऋषि विष्णुर्देवता त्रिष्टुप्छन्दो विष्णोरावाहन--पूजनयोव--

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

नियोगः ॥ ॐ विष्णोरराटमिति ॐ भूर्भुवः स्वः विष्णो ! इहागच्छ इहतिष्ठ० ॐ विष्णवे नमः इति संपूज्य ॥४॥ गुरोर्दक्षिणपार्श्वे ॥ ॐ आब्रह्मन्निति प्रजापतिःऋषिर्ब्रह्मा देवता यजुर्ब्रह्मणः आवाहन--पूजनयोर्विनियोगः ॥ ॐ आब्रह्मन्० ॐ भूर्भुवः ब्रह्मन् इहागच्छ, इहतिष्ठ इत्यावाह्य संस्थाप्य, ॐ ब्रह्मणे नमः इतिपूजयेत् ॥५॥ शुक्रस्य दक्षिणपार्श्वे, ॐसजोषा इन्द्रेति विश्वामित्र ऋषिइन्द्रो देवता, इन्द्रस्यावाहनपूजनयोर्विनयोगः ॥ ॐ सजोषा इन्द्रः० ॐ भूर्भुवः स्वः इन्द्र इहागच्छ, इहतिष्ठ इत्यावाह्य संस्थाप्य, ॐ इन्द्राय नमः इतिपूजयेत् ॥६॥ शनेर्दक्षिणपार्श्वे ॥ ॐ यमायत्वेति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिर्यमोदेवता यमस्यावाहन-पूजनयो--विनियोगः ॥ ॐ यमायत्वा मखाय० ॐभूर्भुवः स्वः यम इहागच्छ, इहतिष्ठेत्याह्य, स्थाप--यित्वा ॐ यमाय नमः इति पूजयेत् ॥ ७ ॥ राहोर्दक्षिणपार्श्वे, ॐ आब्रह्मन्निति० ॐ भूर्भुवः स्वः काल इहागच्छ, इहतिष्ठेत्याह्य संस्थाय, ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आप्रह्मान्नाति० ॐ भूर्भुवः स्वः काल इहागच्छ, इहतिष्ठेत्याहूय संस्थाप्य, ॐ

कालाय नमः इतिपूजयेत् ॥८॥ केतूनां दक्षिणपार्श्वे, ॐ चित्रा वसोः०, ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इह तिष्ठ इत्यावाह्य संस्थाप्य, ॐ चित्रगुप्ताय नमः, इति पूजयेत् ॥९॥ ततः श्वेत–कुसुम–तण्डुलैः प्रत्यधिदेवान्, आवाह्य संस्थाप्य यथोपचारैः पूजयेत् ॥ सूर्य्यस्य वामपार्श्वे, ॐ अग्निं दूतमिति० ओं भूर्भुवः स्वः अग्ने इहागच्छ इहतिष्ठेत्यावाह्य, ॐ अग्नये नमः इतिपूजयेत् ॥१॥ सोमस्य वामपार्श्वे, ॐ अप्स्वग्ने० ॐ भूर्भुवः स्वः आपः इहागच्छ इहतिष्ठेत्यावाह्य, ॐ अद्भ्यो नमः इति पूजयेत् ॥२॥ भौमस्य वामपार्श्वे ॥ ॐ स्योना पृथिवि० ॐ भूर्भुवः स्वः ॐ भूमे, इहागच्छ, इहतिष्ठेत्यावाह्य, ॐ भूम्यै नमः, इति पूजयेत् ॥३॥ बुधस्य वामपार्श्वे ॐ इदं विष्णु० ॐ भूर्भुवः स्वः विष्णो इहागच्छ, इहतिष्ठेत्यावाह्य, ॐ विष्णवे नमः, इति पूजयेत् ॥४॥ गुरोर्वामपार्श्वे, ॐ इन्द्र आसन्नेता० ॐ भूर्भुवः स्वः इन्द्र इहागच्छ, इहतिष्ठेत्यावाह्य, ॐ इन्द्राय नमः इति पूजयेत् ॥ ५॥ शुक्रस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वामपार्श्वे ॐ आदित्यै रास्ना सि० ॐ भूर्भुवः स्वः इन्द्राणि इहागच्छ इहतिष्ठेत्यावाह्य, ॐ इन्द्राण्यै नमः, इति पूजयेत् ॥६॥ शनेर्वामपार्श्वे, ॐ प्रजापतेन,० ॐ भर्भुवः स्वः प्रजापते इहागच्छ इहतिष्ठेति ॐ प्रजापतये नमः इति पू० ॥७॥ राहोर्वामपार्श्वे, ॐ नमोस्तु सर्पेभ्यो नमः ॐ भूर्भुवः स्वः सर्पाः इहागच्छन्तु इह तिष्ठन्तु० ॐ सर्पेभ्यो नमः इति पू० ॥८॥ केतूनां वामपार्श्वे ॐ ब्रह्मयज्ञानं० ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ, इह तिष्ठ इत्यावाह्य, ॐ ब्रह्मणे नमः इति पूजयेत् ॥९॥ ततः श्वेतपुष्प तण्डुलादिभिः, विनायकादि पञ्चलोकपाल देवता पूज्या । राहोरुत्तरभागे— ॐ गणानान्त्वा० ॐ भूर्भुवः स्वः, विनायक, इहागच्छेहतिष्ठेत्यावाह्य, ॐ विनायकाय नमः ॥ इति पू० ॥ शनेरुत्तरभागे ॥ ॐ अम्बे अम्बिके०, ॐ दुर्गेइहागच्छेहतिष्ठेत्यावाह्य, ॐ दुर्गायै नम इति पूजयेत् ॥२॥ सूर्य्यस्योत्तर भागे. ॐ वायो येते० ॐ भर्भुवः स्वः वायो ! इहागच्छेह तिष्ठेत्यावाह्य. ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भागे. ॐ वायो यते० ॐ भूर्भुवः स्वः वायो ! इहागच्छेह तिष्ठत्यावाह्य. ॐ

वायवे नमः इति पूजयेत् ॥३॥ राहोर्दक्षिणभागे, ॐ घृतं घृत पावन० ॐ भूर्भुवः स्वः आकाश इहागच्छ इहतिष्ठेत्यावाह्य ॐ आकाशाय नमः ॥ इतिपूजयेत् ॥४॥ केतूनां दक्षिणभागे० ॐ यावङ्कशां० ॐ अश्विनौ, इहागच्छतामिह तिष्ठताम् इत्यावाह्य, ॐ अश्विनिभ्यां नमः इति पूजयेत् ॥५॥ ततः पूर्वदिश आरभ्य दिक्पालादीन् स्थापयित्वा पूजयेत्, पूर्वे ॐ त्रातारमिन्द्रमवितार० ॐ भूर्भुवः स्वः इन्द्र इहागच्छेहतिष्ठेत्यावाह्य ॐ इन्द्राय नमः ॥ इति पू० ॥ ॥१॥ आग्नेये, ॐ अग्निन्दूतं पुरोदधे० ॐ भूर्भुवः स्वः, अग्ने इहागच्छेह० आवाह्य, ॐ अग्नये नमः इति पू० ॥२॥ दक्षिणे ॐ यमायत्वा मखायत्वा० ॐ भूर्भुवः स्वः, यम इहागच्छेह तिष्ठेत्यावाह्य ॐ यमाय नमः ॥इतिपू०॥ ॥३॥ नैर्ऋत्ये ॐ असुन्वन्तम० ॐ भूर्भुवः स्वः निर्ऋतये नमः इतिपू० ॥४॥ पश्चिमे, ॐ तत्त्वायामि० ॐ भूर्भुवः स्वः, वरुण इहागच्छ इहतिष्ठेत्यावाह्य, ॐ वरुणाय नमः इति वरुणं पूज०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥५॥ वायव्ये, वातो वा० ॐभूर्भुवः स्वः वायो इहागच्छे हतिष्ठेत्यावाह्य, ॐ वायवे नमः, इति वायुं पू० ॥६॥ उत्तरे, ॐ सोमोधेनुम्० ॐ भूर्भुवः स्वः सोम इहागच्छेह तिष्ठेत्यावाह्य, ॐ सोमाय नमः इति सोमं पूजयेत् ॥७॥ ईशाने ॐ वय सोमव्रते ॐ भूर्भुवः स्वः ईशान इहागच्छेहतिष्ठेत्यावाह्य, ॐ ईशानाय नमः इति ईशानं पू० ॥८॥ पूर्वेशान–मध्ये, ॐ ब्रह्मयज्ञानं० ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छेह तिष्ठेत्यावाह्य, ॐ ब्रह्मणे नमः इतिपू० ॥९॥ पश्चिम–नैर्ऋत्यमध्ये, ॐ नमोस्तु सर्पेभ्यो० भूर्भुवः स्वः ॐ अनन्त इहागच्छेह तिष्ठेत्यावाह्य ॐअनन्ताय नमः इति पूजयेत् ॥१०॥तत इन्द्राग्नि–मध्ये, ॐ सुगावो देवा० ॐ भूर्भुवः स्वः अष्ट वसव इहागच्छेह तिष्ठेत्यावाह्य ध्रुवोध्वरस्तथा सोम आपश्चैवाऽनिलोऽनलः ॥ प्रत्युषश्चप्रभाषश्चवसवोऽष्टौ प्रकीर्त्तिताः ॥ ॐ वसुभ्यस्ता० ॐ ध्रुवाद्यष्टवसुभ्यो नमः ॥११॥ इन्द्र–ईशान मध्ये, ॐ यज्ञोदेवानां प्रत्ये० ॐ भूर्भुवः स्वः आदित्या इहागच्छत इहतिष्ठत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मध्ये, ॐ यज्ञादीनां प्रत्य० ॐ भूर्भुवः स्वः आदित्या इहागच्छत इहातिष्ठत

इत्यावाह्य । धाताऽर्यमा च मित्रश्च वरुणेशौ भगस्तथा ॥ इन्द्रो विवश्वान् पूषा च पर्जन्यो दशमः स्मृतः॥ ततस्त्वष्टा, ततोविष्णु द्वादशादित्यदेवता ॥ ॐ धात्रादिद्वादशादित्यदेवेभ्यो नमः इति पू० । ॥२॥ आग्नेय–दक्षिणयोर्मध्ये, ॐ एतावन्तश्च० ॐ भूर्भुवः स्वः रुद्रा इहागच्छत, इह तिष्ठत इत्यावाह्य, वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः॥ अजैकपाद हिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः॥ स्थाणुर्भवश्च भगवान् रुद्रा एकादश स्मृताः ॥ ॐ वीरभद्रादि एकादश रुद्रेभ्यो नमः ॥३॥ यम–निर्ऋतिमध्ये, ॐ गौरीर्मिमा० इति मन्त्रेण, ॐ भूर्भुवः स्वः, गौर्य्यादि षोडश मातरः । इहागच्छत, इह तिष्ठत इत्यावह्य, गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वाहा–स्वधा मातरो लोकमातरः ॥ धृति–स्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवता ॥ ॐ गौर्य्यादि षोडश मातृभ्यो नमः ॥४॥ निर्ऋति–वरुणयोर्मध्ये, ॐ गणानान्त्वा० ॐ भूर्भुवः स्वः गणपते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इहागच्छ इह तिष्ठेत्यावाह्य, ॐ गणपतये नमः इतिपू० ॥५॥ वायुसोममध्ये मरुतो यस्य० ॐ भूर्भुवः स्व० मरुत इहागच्छेहतिष्ठेत्यावाह्य० आवहः प्रवहश्चैव उद्वहः संवहस्तथा ॥ वहः परावहश्चैव तथापरिवहोऽनिलः ॥ ॐ आवाहादिसप्तमरुद्भ्यो नमः ॥६॥ ततः वेद्यामेव (ग्रहवेद्याम्) यथाऽवकाशं ब्रह्मादि पञ्च देवताः पूजयेत् ॥ ॐ ब्रह्मयज्ञानं० ॐ भूर्भुवः स्वः ब्रह्मन्निहाऽऽगच्छेहतिष्ठेत्याबाह्य० ॐ ब्रह्मणे नमः ॥१॥ ॐ इदं विष्णु० ॐ भूर्भुवः स्वः विष्णो ! इहागच्छेहतिष्ठ इत्यावाह्य ॐ विष्णवे नमः ॥२॥ ॐ भूर्भुवः स्वः रुद्र इहागच्छ, इहतिष्ठेत्यावाह्य, ॐ मानस्तोके० ॐ रुद्राय नमः ॥३॥ ॐ अग्नि रश्मि जन्मना० ॐ भूर्भुवः स्वः अर्क इहागच्छेहतिष्ठेत्यावाह्य, ओं विष्णवे नमः, इति पूजयेत् ॥४॥ गुरोर्वामपार्श्वे, ॐ इन्द्र आसन्नेता ॐ भूर्भुवः स्वः वनस्पते, इहागच्छेहतिष्ठेत्यावाह्य, ॐ वनस्पतये नमः ॥५॥ एवम् द्वि-उत्तरशतम् १०२ देवतानामावाहनं स्थापनादिकं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृत्वा सम्पूज्य धूप-दीप--नैवेद्य--दक्षिणाद्रव्यं निवेद्य तत्रैवादिपश्चिमभागे भूमावेव बलिर्देयः ॥ तद्यथा प्रथमम्, आकृष्णेन० ॐ सूर्य्याय गुडौदना-भावे एष दध्यन्नबलिर्नमः ॥ १ ॥ ॐ इमन्देवा० ॐ सोमाय घृतपायसाभावे एषदध्यन्नतबलिर्नमः ॥ २ ॥ ॐ अग्निर्मूर्द्धादिवः, ॐ भौमाय मसूरान्ना-भावे एष दध्यन्नबलिर्नमः ॥ ३ ॥ ॐ उद्बुध्यस्वाग्ने० ॐ बुधाय दुग्धौना-भावे एष दध्यन्नततबलिर्नमः ॥ ४ ॥ ॐ बृहस्पतये अति० ॐ बृहस्पते दध्यौदनाभावे एष दध्यन्नतललिर्नमः ॥५॥ ॐ अन्नात्परिस्रुतः० ॐ शुक्राय घृतौदनाभावे एष दध्यन्नतबलिर्नमः ॥ ७ ॥ कयानश्चित्रः ॐ राहवे छागमांसाभावे, एष दध्यन्नतबलिर्नमः ॥ ८ ॥ ॐ केतुं कृण्वन्न ॐ केतुभ्य-श्चित्रौदनाभावे एष दध्यन्नतबलिर्नमः ॥ ९ ॥

अथाधिदेवतानाम् ॥ ॐ त्र्यम्बकं यजामहे० ॐ ईश्वराय घृतपायसा-भावे एष दध्य० ॥ १ ॥ ॐ श्रीश्चते लक्ष्मीश्च० ॐ उमायै घृतपायसा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावे एष दध्य० ॥२॥ ॐ यदक्रन्द्रः० ॐ स्कन्दाय घृतपायसाभावे एष दध्य० ॥३॥ ॐ विष्णोरराट विष्णवे० घृतपायसाभावे एष दध्य० ॥४॥ ॐ आब्रह्मन्० ॐ ब्रह्मणे घृतपायसाभावे एष दध्य० ॥५॥ ॐ सजोषा इन्द्र० ॐ इन्द्राय घृतपायसाभावे एष दध्य० ॥६॥ ॐ असियमः० ॐ यमाय घृतपायसाभावे एष दध्य० ॥७॥ ॐ कार्षिरसि० ॐ कालाय घृतपायसाभावे एष दध्यक्षतबलिनमः ॥८॥ ॐ चित्रावसोः० ॐ चित्रावसोः० घृतपायसाभावे एष दध्यक्षतबलिनमः ॥९॥ इत्यधिदेवता ॥

अथ प्रत्यधिदेवतानाम् ॥ ॐ अग्निन्दूतं० ॐ अग्नये घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥ १ ॥ ॐ अप्स्वतः० ॐ अद्भ्यो घृतपायसाभावे एष दध्य० ॥२॥ ॐ स्योनापृथिवि० ॐ पृथिव्यैघृतपायसाभावे एष दध्यक्षत० ॥३॥ ॐ इदं विष्णुर्विचक्रमे० ॐ विष्णवे घृतपायसाभावे एष दध्यक्षत० ॥४॥ ॐ त्रातारमिन्द्र० ॐ इन्द्राय घृतपायसाभावे एष दध्यक्षतबलिर्नमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥५॥ ॐ नियुत्वान्वायो० ॥ ॐ शच्यै घृतपायसाभावे एष दध्य० ॥५॥ ॐ प्रजापतेनत्व० ॐ प्रजापतये घृतपायसाभावे एष दध्यन्नतबलिर्नमः ॥७॥ ॐ नमोस्तु सर्प्पेभ्य०, ॐ सर्पाय घृतपानसाभावे एष दध्यन्नत-बलिर्नमः ॥८॥ ॐ ब्रह्मयज्ञानम्० । ॐ ब्रह्मणे घृतपायसाभावे एष० ॥९॥

अथ विनायकादिपञ्च० ॐ गणनान्त्वा० विनायकाय घृतपायसाभावे एष दध्य० ॥१॥ ॐ अम्बे अम्बिके० दुर्गार्य घृतपायसाभावे एष दध्य० ॥२॥ ॐ वातोवा० ॐ वायवे घृतपायसाभावे एष दध्यन्नत० ॥३॥ ॐ घृतं घृतपावनः० ॐ आकाशाय घृतपायसाभावे एष दध्य० ॥४॥ ॐ यवांकशा० ॐ अश्विनिकुमाराभ्यां घृतपापसाभावे एष दध्य० ॥५॥

अथ दिक्पालन्—इन्द्रस्तु महसादिसः सर्वदेवाधिपो महान् । वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥ ॐ इन्द्राय माषभक्ताभवे एष दध्यन्नत बलिर्नमः ॥१॥ ॐ अग्नयेः पुरुषोरक्तः सर्वदेवमयोऽव्ययः ॥ धूमकेतू रजोध्यन्न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तस्मै नित्यं नमोनमः "ॐ अग्नये माषभक्ताभावे एष दध्यन्नत० ॥२॥ ॐ यमश्चोत्पन्नपत्राभः किरीटदण्डधृक्सदा ॥ धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमोनमः" ॐ यमाय माषभक्ताभावे एष दध्य० ॥४॥ ॐ निर्ऋतिस्तु पुमान्कृष्णः सर्वरक्षाधिपो महान् ॥ ॐ खड्गहस्तो महान् सत्त्वस्तस्मै नित्यं नमोनमः ॥ ॐ निर्ऋतये माषभक्ताभावे एष दध्यन्नतबलिर्नमः ॥४॥ ॐ वरुणः सर्वदा विष्णुः पुरुषो निम्नगाधिपः ॥ पाशहस्तो महासत्वस्तस्मै नित्यं नमोनमः ॥ ॐ वरुणाय माषभक्ताभावे एष दध्यन्नतबलिर्नमः ॥५॥ ॐ वायुस्तु सर्ववर्णोऽयं सर्वगन्धवहः शुचिः ॥ पुरुषोध्वजहस्तश्च तस्मै नित्यं नमोनमः ॥ ॐ वायवे माषभक्ताभावे एष दध्यन्नतबलिर्नमः ॥६॥ ॐ गौरी यस्तु पुमान् सौम्यः सर्वौषधिसमन्वितः ॥ नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमोनमः ॥ ॐ सोमाय माषभक्ताभावे एष दध्यन्नतबलिर्नम ॥७॥ ॐ ईशानः पुरुषः शुक्लः सर्वदेवाधिपो महान् ॥ शूलहस्तो विरूपाक्ष-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तमै नित्यं नमोनमः ॥ ॐ ईशानाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥८॥ पद्मयोनिश्चतुर्मूर्त्तिर्वेदव्यासः पितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमोनमः ॥ ॐ ब्रह्मणे माषभक्ताभावे एष दध्यक्षत० ॥९॥ ॐ योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥ पुष्पवद्धारयन्मूर्ध्नि स्तस्मै नित्यं नमोनमः ॥ ॐ अन्तराय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥१०॥

ॐ वसुभ्यस्त्वा० ॐ अष्टवसुभ्यो माषभक्ताभावे एष दध्यक्षत बलिर्नमः ॥१॥ ॐ यज्ञो देवानाम्० ॐ धात्रादि द्वादशादित्येभ्यो माषभक्ताभावे एष दध्यक्षत० ॥२॥ ॐ यऽएतावन्तश्च० ॐ वीरभद्रादि एकादश रुद्रेभ्यो माषभक्ताभावे एष दध्यक्षत० ॥३॥ ॐ गौरीमिमा० ॐ गौर्य्यादि षोडशमातृभ्यो माषभक्ताभावे एष दध्यक्षत० ॥४॥ ॐ मरुतो यस्य० ॐ आवाहादि सप्तमरुद्भ्योमाषभक्ताभावे एष दध्यक्षत० ॥५॥ ॐ गणानान्त्वा० ॐ गणपतये माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥६॥ ॐ ब्रह्म

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

यज्ञानम्० ॐ ब्रह्मणे माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥७॥ ॐ इदं विष्णुः० ॐ विष्णवे माषभक्ताभावे एष दध्यक्षत० ॥८॥ ॐ मानस्तोके तन० ॐ रुद्राय माषभक्ताभावे एष दध्यक्षत० ॥९॥ ॐ अग्निरस्मि जन्मना० ॐ अर्काय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥१०॥ ॐ वनस्पते विड्वंग० ॐ वनस्पतये, माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥११॥ एवं बलिर्दत्त्वा फलादि पक्वान्नादि नैवेद्यानि सूर्य्यादि बेवताभ्यो नमः इति समर्पयेत् ॥ ततो ग्रहवेद्युपरि वस्त्रवितानम् कुर्य्यात्, फलपुष्पशोभितम् वितानकं बृहस्पति दैवत्यं श्रीसूर्य्यादि नवग्रहदेवताभ्यो नमः ॥ एवं पूजां निवर्त्त्य, अग्नेर्दक्षिणतः, उपविश्य, उत्तराभिमुखो भूत्वा, कुशयवजलान्यादाय ॐ अद्येत्यादि देशकालौ संकीर्त्त्य, एवं शुभसमये ग्रहशान्तिकर्मणि, इदमाज्यादि हवनीयद्रव्यम् पूर्वमाघाराज्यभागप्रजापति--इन्द्राग्नि--सोमदेवताभ्यः प्रधान भूतेभ्यः सूर्यसोममौमबुधबृहस्पतिशुक्रशनैश्चर – राहुकेतवः, उपग्रह,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताख्याधिदेवताः, अग्निआप-भूमि--विष्णु--इन्द्र--इन्द्राणि, प्रजापतिसर्पब्रह्माख्याः प्रत्यधिदेवता, विनायक-दुर्गा--वायु--आकाश--अश्विन्याख्येति पञ्चलोकपालाः इन्द्र--अग्नि--यम निर्ऋति--वरुण--वायु--सोमेशान--ब्रह्मानन्ताख्यदिक्पालाः, ध्रुवाद्यष्टवसु, धात्रादि द्वादशादित्य, वीरभद्रादि एकदश रुद्र, गौर्यादिषोडषमातर, आवाहादि सप्त मरुतो ब्रह्म--विष्णु--रुद्रार्क--वनस्पति--देवताभ्यः, उत्तरांग--भूर्भुवः स्वः अग्नि--वरुण--सवितृ--विष्णु--विश्वेदेवमरुत्स्वर्कप्रजापतिस्विष्ट-कृद्देवेभ्यो मया दत्तमिति सर्वदेवतोद्देशेन युगपद्द्रव्यत्यागं कुर्य्यात्। प्रत्याहुतित्तागस्य कर्तुमशक्यत्वात् होमप्रणादिस्वाहान्तस्तत्तद्दैवत्य मंत्रैर्ऋग्वेद--छन्दोऽनुकीर्त्तनपूर्वकं नवग्रहाधिदेवता पञ्च लोकपाल दशदिक्पालाष्टवसु--द्वादशादित्यैकादशरुद्र--षोडशामातृरः सप्तमरुत् ब्रह्माविष्णुरुद्रार्कवनस्पतीनां प्रत्येकमष्टोत्तरशतमष्टाविंशति, द्वादशाष्टौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाहुतयः ॥ इत्येकं कार्यम् ॥ वस्वादित्यरुद्रमातृमरुतां मंत्रानुरोधेन समुदितमेव होमः प्रत्येकं मन्त्राभावात् ॥ ततः समुदितपक्षे, एक पञ्चाशत् देवताः ॥ अष्टोत्तरशताहुतिषु पञ्चसहस्राणि पञ्चशतान्यष्टौ चाहुतयः ॥५५०८॥ अष्टाविंशत्याहुतिषु चतुर्दश शतान्यष्टाविंशत्याहुतयः ॥१४२८॥ द्वादशाहुतिषु षट्शतानि द्वादशाभ्वाहुतयः ॥६१२॥ अष्टाहुतिषु चतुःशतान्यष्टौ चाहुतयः ॥४०८॥ जापक सूक्तानि च जपेत् ॥ अस्मिं विधौ गुरुः सर्वाध्यक्षस्तिष्ठेत् ॥

ततः समिद्धतमे निर्धूमे हुताशने दक्षिणजानु पातयित्वा होता आज्यपूर्णं स्रुवेण प्रथमं मनसा । विनियोगपूर्वकम् ॥ ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये ॥ इति प्रजापत्यमाधारं जुहुयात् ॥ स्रुवस्थ हुतशेषं च प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्टु प्छन्द इन्द्रो देवता नवग्रहमखे आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा, इदमिन्द्राय ॥ इति द्वितीयमाघारमग्नेर्दक्षिणभागे जुहुयात् ॥ ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टु प्छन्दोऽग्निर्देवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ अग्नये स्वाहा, इदमग्नये ॥ इति आज्यभागं जुहुयात् ॥ ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टु प्छन्दः सोमोदेवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ सोमाय स्वाहा इदं सोमाय ॥ इति द्वितीयमाज्यभागमग्नेरुत्तरभागे जुहुयात् ॥ अथ प्रधानदेवता होमः ॥

तत्र सूर्य्यस्य, ॐ आकृष्णेनेति हिरण्यस्तुप ऋषिस्त्रिष्टु प्छन्दः सविता देवता आदित्यप्रीतये कपिलाग्नौ आज्यहोमे ऽर्क समिद्धोमे च विनियोगः । ॐ आकृष्णेन० स्वहा, इदं सूर्य्याय ॥१॥ इमं देवेति वरुण ऋषिः सोमो देवता यजुः सोम प्रीतये पिंगलाग्नौ आज्यहोमे समिद्धोमे च विनियोगः ॥ ॐ इमं देवा०, स्वाहा, इदं सोमाय ॥२॥ ॐ अग्निर्मूर्द्धा दिवमिति विरुपाच्च

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ऋषिर्गायत्रीछन्दो ऽङ्गारको देवता कुजप्रीतये धूमकेत्वग्नौ, आज्यहोमे खदिर समिद्धोमे च विनियोगः । ॐ अग्निर्मूर्द्धा० । ॐ भौमाय स्वाहा, इदं भौमाय ॥३॥ ॐ उद्बुध्यस्वेति परमेष्ठि ऋषिर्बुधोदेवता त्रिष्टु प्छन्दोबुधप्रीतये जाठराग्नौ आज्यहोमे ऽपामार्गसमिद्धोमे च विनियोगः ॥ ॐ उद्बुध्यस्य०, स्वाहा, इदं बुधाय ॥ ॐ बृहस्पतेऽअतीति गृत्समद ऋषि र्बृहस्पतिर्देवता त्रिष्टु प्छन्दो बृहस्पतिप्रीतये शिखिनामाग्नौ, आज्यहोमे, अस्वत्थ समिद्धोमे च विनियोगः ॥ ॐ बृहस्पतये अति०, स्वाहा—इदं बृहस्पतये ॥४॥ ॐ अन्नात्परिस्रुत इति प्रजापतिः, अश्वी सरस्वतीन्द्रा ऋषयः शुक्रो देवता जगती-छन्दः शुक्रप्रितये हाटकाग्नौ आज्य-उदुम्बर-समिद्धोमे च विनियोगः ॥ ॐ अन्नात्परिस्रुत० स्वाहा, इदं शुक्राय ॥६॥ ॐ शन्नोदेवीरिति दध्यङ् ङाथर्वण ऋषिः शनिर्देवता गायत्रीछन्दः शनैश्चरप्रीतये महातेजाग्नौ, आज्यहोमे शमि-समिद्धोमे च विनियोगः ॥ ॐ शन्नोदेवी०, स्वाहा, इदं शनिश्चराय ॥७॥ ॐ

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

कयानश्चित्रेति वामदेवऋषिः राहुर्देवता गायत्री छन्दः, राहुप्रीतये हुताशनाग्नौ, आज्यहोमे दूर्वासमिद्धोमे च विनियोगः । ॐ कयनश्चित्र० ॐ राहवे स्वाहा, इदं राहवे ॥८॥ ॐ केतुं कृण्वन्निति मधुच्छन्द ऋषिः केतवो देवता गायत्री-छन्दः केतुप्रीतये रोहिताग्नौ आज्यहोमे कुशसमिद्धोमे च विनियोगः ॥ ॐ केतुम् कृण्वन्० स्वाहा, इदं केतुभ्यः ॥९॥ अथाधिदेवताहोमः ॥

ॐ त्र्यम्बकमिति वसिष्ठ ऋषि रुद्रो देवता अनुष्टुप्छन्दस्त्र्यम्बप्रीतये, आज्यहोमे चरुहोमे च विनियोगः ॐ त्र्यम्बकं यजा० स्वहा, इदं त्र्यम्बकाय ॥१॥ अत्र प्रणीतोदकस्पर्शः ॥ ॐ श्रीश्चते लक्ष्मीश्च० ॐ उमायै स्वहा, इद-मुमायै ॥२॥ ॐ यदक्रन्द इति भास्कर-जमदग्नि-दीर्घतमत-ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ स्कन्दाय स्वहा इदं स्कन्दाय ॥३॥ ॐ विष्णोरराटमिति, उतथ्यऋषिर्विष्णु-र्देवता यजुर्विष्णुः प्रीतये आज्यहोमे च विनियोगः । ॐ विष्णो

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

रराटम् । ॐ विष्णवे स्वाहा, इदं विष्णवे ॥४॥ ॐ आब्रह्मन्निति प्रजापतिः ऋषिर्ब्रह्मा देवता ब्रह्माप्रीतये आज्यहोमे--चरुहोमे च विनियोगः ॥ ॐ आब्रह्मन्० ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥५॥ ॐ सजोषा इन्द्रेति विश्वामित्र ऋषिरिन्द्रो देवता, इन्द्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ सजोषा इन्द्र०, ॐ इन्द्राय स्वाहा, इदमिन्द्राय ॥६॥ ॐ असियम इति भार्गव यमदग्नि दीर्घतमस ऋषयो यमो देवता त्रिष्टु प्छन्दो यम प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॐ यमाय स्वाहा, इदं यमाय ॥७। अत्र प्रणीतो--दकस्पर्शः ॥ ॐ कार्षिरसीति दध्यङ् ङाथर्वण--ऋषिः कालो देवता, अनुष्टु प्छन्दः कालप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ कार्षि रसि० ॐ कालाय स्वाहा, इदं कालाय ॥८॥ ॐ चित्रावसोरिति देवा ऋषय श्चित्रगुप्तो देवता जगती छन्दश्चित्रगुप्तप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॐ चित्रगुप्ताय स्वाहा, इदं चित्रगुप्ताय ॥९॥ अत्र प्रणीतोदकस्पर्शः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विनियोगः ॐ चित्रगुप्ताय स्वाहा, इदं चित्रगुप्ताय ॥६॥ अत्र प्रणीतादिकस्पर्शः ॥

अथ प्रत्यधिदेवताहोमः ॥ ॐ अग्निन्दूतमिति विरूपाच्च ऋषिराग्नेर्देवता गायत्रीछन्दोग्निप्रीतये, आज्यहोमे चरुहोमे च विनियोगः । ॐ अग्नये स्वाहा इदमग्नये ॥१॥ ॐ अप्स्वन्तरिति बृहस्पतिर्ऋषिरापो देवता पुर उष्णिक्छन्दोऽपां प्रीतये, आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अप्स्वन्त० ॐ अद्भ्यः स्वाहा, इदमद्भ्यः ॥२॥ ॐ स्योना पृथिवीति मेधातिथिर्ऋषिः पृथिवी देवता गायत्रो छन्दः पृथिवी प्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ स्योना पृथिवी नोभवा० ॐ पृथिव्यै स्वाहा, इदं पृथिव्यै ॥३॥ ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्री छन्दो विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इदं विष्णुः० ॐ विष्णवे स्वाहा इदं विष्णवे ॥४॥ ॐ त्रातारमिन्द्रमिति गार्ग्यऋषिरिन्द्रोदेवता त्रिष्टुप्छन्दः इन्द्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॐ त्रातारमिन्द्र० ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥ ५ ॥ ॐ अदित्यै रास्नेति दध्यडाथर्वण ऋषिरिन्द्राणीदेवता

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

यजुः शची प्रतीपे आज्यहोमे चरुहोमे च विनियोगः । ॐ आदित्यै रास्ना० ॐ शच्यै स्वाहा इदं शच्यै ॥६॥ ॐ प्रजापतेनेति वरुण ऋषिः प्रजापतिर्देवता त्रिष्टुप् छन्दः प्रजापतिप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ प्रजापतेन० ॐ प्रजापतये स्वाहा इदं प्रजापतये ॥७॥ ॐ नमोस्तु सर्पेभ्य इति देवा ऋषयः सर्पा देवता अनुष्टुप् छन्दः सर्पप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ नमोस्तुसर्पेभ्यः, ॐ सर्पेभ्यः स्वाया इदं सर्पेभ्यः ॥८॥ ॐ ब्रह्मयज्ञानमिति प्रजापतिः ऋषिर्ब्रह्मा देवता त्रिष्टुप् छन्दो ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ ब्रह्मयज्ञानम्० ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥९॥

अथ विनायकादिपञ्चानाम् ॥ ॐ गणानान्त्वेति प्रजापतिऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये, आज्यहोमे चरुहोमे च विनियोगः । ॐ गणानान्त्वा० ॐ विनायकाय स्वाहा, इदं विनायकाय ॥१॥ ॐ अम्बे अम्बिक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नान्त्वा० ॐ विनायकाय स्वाहा, इदं विनायकाय ॥१॥ ॐ अम्ब अम्बिके

इति प्रजापतिर्ऋषि र्दुर्गा देवताऽनुष्टु प्छन्द दुर्गाप्रीतये, आज्यहोमे चरुहोमे च विनियोगः। ॐ अम्बेऽअम्बिके० ॐ दुर्गायै स्वाहा इदं दुर्गायै ॥२॥ ॐ वातो–वेति गन्धर्वा ऋषयः वातोदेवता उष्णिक्छन्दो वायुप्रीतये आज्यहोमे चरुहोमे च विनियोगः। ॐ वातोवा० ॐ वायवे स्वहा इदं वायवे ॥३॥ ऊर्ध्वा अस्येति प्रजापतिऋषिराकाशो देवता उष्णिक्छन्दः आकाशप्रीतये आज्यहोमे चरु–होमे च विनियोगः ॥ ॐ ऊर्ध्वाऽअस्य० ॐ आकाशाय स्वाहा इदमाकाशाय ॥४॥ ॐ अश्विनोर्भैषज्येति अश्विनौ ऋषी, अश्विनौ देवते, यजुरश्वी प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अश्विनोर्भैषज्येन तेजसे०, ॐ अश्विनिकुमाराभ्यां स्वाहा, इदमश्विनिकुमाराभ्याम् ॥५॥

अथ दिक्पालदेवतानां होमः। ॐ त्रातारमिन्द्रमिति गार्ग्य ऋषिरिन्द्रो देवता त्रिष्ट प्छन्द इन्द्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः। ॐ त्रातार

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

मिन्द्र० ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥१॥ ॐ अग्निन्दूतमिति विरूपाक्ष ऋषिरग्निर्देवता गायत्री छन्दोग्निप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ अग्निदूतम्० ॐ अग्नये स्वाहा इदमग्नये ॥२॥ ॐ असि-यम इति भार्गव जमदग्नि-दीर्घतमस ऋषयो यमोदेवता त्रिष्टुप्छन्दो यम-प्रतीये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ असियम० ॐ यमाय स्वाहा इदं यमाय ॥३॥ ॐ एषते निर्ऋत इति वरुण ऋषिनिर्ऋतिर्देवता यजुनि-र्ऋतिप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ एषते निर्ऋते भागस्तं-जुषस्व स्वाहा इदं निर्ऋतये ॥४॥ ॐ इमंमे वरुण इति शुनशेफ ऋषिर्व-रुणो देवता गायत्री छन्दो वरुणप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इमंमे वरुण० ॐ वरुणाय स्वाहा इदं वरुणाय ॥५॥ ॐ वातोवेति गन्धर्वा ऋषयो वायुर्देवता उष्णिक्छन्दो वायुप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ वायवे स्वाहा इदं वायवे ॥६॥ ॐ वय ऽ सोमे बन्धु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋषिः सोमो देवता गायत्री छन्दः सोमप्रीतये आज्यहोमे चरुहोमे च विनियोगः। ॐ वय ऽ सोमव्र॰ ॐ सोमाय स्वाहा, इदं सोमाय ॥७॥ ॐ तमीशानमिति गौतमऋषिरीशानो देवता जगती छन्द ईशानप्रीतये आज्यहोमे च विनियोगः। ॐ तमीशानम्॰ ॐ ईशानाय स्वाहा इदमीशानाय ॥८॥ अत्र प्रणीतोदकस्पर्शः॥ ॐ नमोस्तु सर्पेभ्य इति देवाऋषयोऽनन्तो देवता अनुष्टुप् छन्दोऽनन्तप्रीतये आज्यहोमे चरुहोमे च विनियोगः। ॐ नमोस्तु सर्पेभ्यः॰। ॐ अनन्ताय स्वाहा इदमनन्ताय ॥९॥ ॐ ब्रह्मयज्ञानमिति प्रजापतिर्ऋषिर्ब्रह्मादेवता त्रिष्टुप् छन्द ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ ब्रह्मयज्ञानम्॰ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥१०॥ इति दिक्पालहोमः॥

अथ वस्वादिदेवतानाम्॥ ॐ सुगावोदेव इति देवा ऋषयो वसवो देवतास्त्रिष्टुप् छन्दो वसुप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ सुगावो

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

देवा० ॐ अष्टवसुभ्यः स्वाहा, इदमष्टवसुभ्यः ॥१॥ ॐ यज्ञो देवनामिति कुत्स ऋषिरादित्यो देवता त्रिष्टुप् छन्द आदित्य प्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ यज्ञो देवानाम् ॥ ॐ द्वादशादित्येभ्यः स्वाहा, इदं द्वादशादित्येभ्यः ॥२॥ ॐ य एतावन्त इति परमेष्ठी ऋषी रुद्रो देवता, अनुष्टुप् छन्दो रुद्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ य एतावन्त० ॐ वीरभद्रादि एकादश रुद्रेभ्यः स्वाहा इदं वीरभद्रादि एकादशरुद्रभ्यः ॥३॥ अत्र मणीतोदकस्पर्शः ॥ ॐ गौरीमिमा० इति प्रजापतिऋषिस्त्रिष्टुप्छन्दो मातरो देवता गौर्य्यादिमातृदेवताप्रीतये, आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ गौरीमिमाशलिलानि० ॐ गौर्य्यादि षोडश मातृभ्यः स्वाहा इदं गौर्य्यादि षोडश मातृभ्यः ॥४॥ ॐ मरुतो यस्येति गौतम ऋषिर्मरुतो देवता गायत्रीछन्दो मरुतां प्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ मरुद्भ्यः स्वाहा इदमावहादि मरुद्भ्यः ॥५॥ ॐ आब्रह्मन्० इति प्रजापतिर्ऋषिर्ब्रह्मा देवता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यजुर्ब्रह्मा प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ आब्रह्मन्० ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥१॥ ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्री छन्दो विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इदं विष्णुर्विचक्रमे० ॐ विष्णवे स्वाहा इदं विष्णवे ॥२॥ ॐ मानस्तोक० इति कुत्स ऋषी रुद्रोदेवता गायत्रीछन्दो रुद्रप्रीतये आज्यहोमे च विनियोगः ॥ ॐ मानस्तोके तनये० ॐ रुद्राय स्वाहा इदं रुद्राय ॥३॥ अत्र प्रणीतोदक स्पर्शः ॥ ॐ चित्रन्देवानामिति कुत्सऋषिः सूर्य्यो देवता अर्कप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ चित्रन्देवानामुद० ॐ अर्कायस्वाहा, इदमर्काय ॥४॥ ॐ अय ऽ इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता यजुर्वनस्पतिप्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ अय ऽ० हित्वा स्वधिस्तेतिजानः प्राणी रुहेम स्वाहा । ॐ बनस्पतये स्वाहा इदं वनस्पतये ॥५॥ इति होमः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ ग्रहाणां जपसूक्तानि ॥ तत्रादित्यस्य—ॐ विभ्राडिति 'सप्तदशस्य ऋचस्यानुवाकस्य आद्यानां चतसृणां प्रस्कण्व ऋषिः पञ्चम्या आवत्सरः काश्यपऋषिः षष्ठ्या वेन ऋषिः सप्तम्याः कुत्सऋषिरष्टम्या अगस्त्य ऋषिर्नवम्या सुतकक्ष सुकक्ष ऋषी दशम्याः प्रस्कण्वशृषिरथ चतसृणां जमदग्निर्ऋषिः पञ्चदश्या नृमेधा ऋषि षोडश्याः कुत्स ऋषिरन्त्याया हिरण्यस्तुप आंगिरस ऋषिः पञ्चम्या विश्वेदेवा देवत. याः सोमोदेवता अन्यासां सूर्य्यो देवता । आद्या पञ्चमी च जगती छन्दो द्वितीयादि तिस्रो नवमी दशमी च गायत्र्यश्छन्दांसि त्रयोदशी, चतुर्दशी पञ्चदशी-पथ्या-बृहती छन्दांसि शेषाः सप्त स्त्रिष्टुप्छन्दांशि सूर्यप्रीतये जपे विनियोगः ॥ ॐ विभ्राड्-बृहत्० ॥१॥ ॐ आषाढं युत्सु० इति चतसृणां गौतम ऋषिः सोमोदेवता त्रिष्टुप्छन्दः सोमप्रीतये जपे विनियोगः ॐ अग्निमूर्द्धेति विरूपाक्ष ऋषिरग्निदेवता गायत्रो छ दो भौमप्रीतये जपे विनियोग। ॐ आग्न-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मूर्द्धा० ॥१॥ ॐ उद्बुध्वस्वेति परमेष्ठी ऋषिरग्नि देवता त्रिष्टुप्छन्दो बुधप्रीतये जपे विनियोगः ॥ ॐ उद्बुध्वस्वाग्ने० ॥१॥ ॐ बृहस्पतेऽअति० इति गृत्समद ऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये जपे विनि-- योगः ॥ ॐ बृहस्पतेऽअति० ॥१॥ ॐ अन्नात्परिस्रुत० इति प्रजापत्यश्च सरस्वतोन्द्रो ऋषय इन्द्रो देवता जगती छन्दः। शुक्रप्रीतये जपे विनियोगः ॐ अन्नात्परिश्रुतः ॥१॥ ॐ शन्नोदेवीरिति दध्यङ्ङाथर्वण ऋषिरापोदेवता गायत्रीछन्द शनिप्रीतये जपे विनियोगः ॥ ॐ शन्नोदेवीरभिष्ट० ॥१॥ ॐ कयानश्चित्रेति वामदेव ऋषिरिन्द्रो देवता गायत्रीछन्दो राहुप्रीतये जपे विनियोगः ॐ कयानश्चित्र० ॥१॥ केतुं कृण्वन्निति मधुछन्दो ऋषिरग्नि देवता गायत्रीछन्दः केतुप्रीतये जपे विनियोगः ॐ केतुं कृण्वन० ॥१॥

अथाधिदेवतानाम् जपसूक्तानि ॥ ॐ नमस्त० इति षट्षष्ठि मंत्रात्मनो रुद्राध्यायस्य परमेष्ठी ऋषिराद्यानां षोडशानामेकरुद्रो देवता ततो बहुरुद्रो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवता आद्या गायत्री छन्दस्तिस्रोऽनुष्टुभश्छन्दांसि द्वे जगत्यौ छन्दसी नमो हिरण्य बाहव इत्यतस्त्रिंशद्यजूंषि, द्वापे अन्धस इत्युपरिष्टाद्बृहती छन्द इमा रुद्रायेति जगती छन्दो, यातेरुद्रेति, अनुष्टुप्छन्द स्ततो द्वे त्रिष्टुभौ, छन्दसी विकिरुद्रेत्याद्या द्वादशानुष्टुभश्छन्दांसि शेषाणि त्रीणि यजंषि रुद्रप्रीतये जपे विनियोगः ॐ नमस्ते रुद्र मन्यव' ..... जम्भेदध्मः ॥६६॥

ॐ श्रीश्चक्र इति नारायण ऋषि र्नारायणे देवता त्रिष्टुप्छन्दः, उमाप्रीतये जपे विनियोगः ॥ ॐ श्रीश्चते॰ ॥१॥ ॐ यदक्रन्द इति भार्गव जमदग्नि र्दीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतये जपे विनियोगः ॥ ॐ यदक्रन्द॰ ॥१॥ ॐ सहस्रशीर्षेति षोडशानां नारायण ऋषिः पुरुषो देवता अनुष्टुप्छन्दः, अन्त्यायास्त्रिष्टुप्छन्दो विष्णुप्रीतये जपे विनियोगः ॥ ॐ सहस्रशीर्षा॰ ..... सन्तिदेवाः ॥१६॥ ॐ आब्रह्मन्निति प्रजापतिर्ऋषि-र्ब्रह्मादेवता यजुर्ब्रह्मप्रीतते जपे विनियोगः ॐ आब्रह्मन्' ' ' ' कल्पन्ताम् ॥१॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ॐ आशुशिशानः, इति द्वादशानाम् गतिरथ ऋषिरिन्द्रो देवता त्रिष्टुप्छन्द इन्द्रप्रीतये जपे विनियोगः ॐ आशुः शिशान ..... सचन्ताम् ॥१२॥ ॐ यमायत्वेति दध्यङ्ङाथर्वण ऋषिर्यमो देवता यजुर्यमप्रीतये जपे विनियोगः ॥ ॐ यमायत्वां गिरस्वत पितृमते स्वाहा॰ ॥१॥ ॐ कार्षिरसीति दध्यङ्ङाथर्वण ऋषिरापोदेवता, अनुष्टुप्छन्दः कालप्रीतये जपे विनियोगः ॥ ॐ कार्षि रसि॰ ॥१॥ ॐ चित्रा वसो॰ इति ऋषयो रात्रिर्देवता जगती सन्दश्चित्रप्रसप्रीतये जपे विनियोगः ॥ ॐ चित्रावसो॰ ॥१॥ अथ प्रत्यधि देवतानाम् ॥ ॐ अस्या जरास॰ इति सप्तदश ऋचामाद्यायावत्स ऋषिरिन्द्र वायूदेवते त्रिष्टुप्छन्दो द्वितीयाया विरूप ऋषिरिन्द्रवायू देवते गायत्री छन्द स्तितीयाया गौतम ऋषिमित्रावरुणौ देवते गायत्री छन्दश्चतुर्थ्या विरूप ऋषि रिन्द्रावरुणौ देवते गायत्रीछन्दः पञ्चम्याः कुप्सः ऋषिः शुक्रो देवता त्रिष्टु प्छन्दः षष्ठ्या वामदेव ऋषि रग्निर्देवता जगती छन्दः सप्तम्या विश्वामित्र

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ऋषिरिन्द्रो देवता त्रिष्टुप्छन्द, अष्टम्या भरद्वाज ऋषिरग्निर्देवता त्रिष्टुप्छन्दो, नवम्या भरद्वाज ऋषिर्विश्वेदेवता गायत्री छन्दो, दशम्या मेधातिथिर्ऋषि-रग्निर्देवता गायत्री छन्दः, एकादश्याः शक्तिपराशर ऋषिर्मरुतो देवता त्रिष्टुप्छन्दो, द्वादश्या भारद्वाज ऋषिरग्निर्देवता त्रिष्टुप्छन्दस्त्रयोदश्या भरद्वाज ऋषिरग्निर्देवता त्रिष्टुप्छन्द श्चतुर्दशी पञ्चदश्या वशिष्ठ ऋषिरादित्या देवता बृहती छन्द, षोडश्या वामदेव ऋषिरग्निर्देवता त्रिष्टुप्छन्दः सप्तदश्या नशो धातक ऋषिः सविता देवता त्रिष्टुप्छन्दोऽग्निप्रीतये जपे विनियोगः ॥ ॐ अस्या जरासः.....आद्या वृणीमहे० ॥१॥ ॐ आपो हिष्ठेति तिसृणां सिन्धुद्वीप ऋषिरापो देवता गायत्रीछन्दोऽपां प्रीतये जपे विनियोगः ॥ ॐ आपो हिष्ठा० ॥३॥ ॐ स्योनापृथिवीति दध्यङ ङाथर्वण ऋषिः पृथिवी देवता गायत्रीछन्दः पृथिवी प्रीतये जपे विनियोगः । ॐ स्योना पृथिवीनो० ॥१॥ॐ सहस्र शीर्षेति नारायण ऋषिः पुरुषो देवता त्रिष्टुप्छन्दः, अन्त्याया अनुष्टु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्छन्दो विष्णुप्रीतये जपे विनियोगः ॥ ॐ सहस्र शीर्षा० ..... सन्ति-
देवाः ॥१६॥ ॐ आशुः शिशानः० इति द्वादशानामप्रतिरथ ऋषिरिन्द्रो
देवता त्रिष्टुप्छन्द इन्द्रप्रीतये जपे विनियोगः ॥ आशुः शिशानः० ....
सचन्ताम् ॥१२॥ आदित्यै रास्नेति दध्यङ्ङाथर्वण ऋषिरिन्द्राणीदेवता
यजुरिन्द्राणी प्रीतये जपे विनियोगः ॐ आदित्यै रास्ना० ॥१॥ ॐ हिरण्य-
गर्भ० इति हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापति प्रीतये
जपे विनियोगः ॥ ॐ हिरण्यगर्भ समवर्त्तताग्रे० ॥४॥ ॐ नमोस्तु सर्पेभ्य
ऋचोदेवा ऋषयः सर्पा देवता अनुष्टुप्छन्दः सर्पप्रीतये जपे विनियोगः ॐ
नमोस्तु सर्पेभ्य० स्वाहा ॥३॥ ॐ ब्रह्मयज्ञानमिति प्रजापतिर्ऋषिरादित्यो
देवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ ब्रह्मयज्ञानम्० ॥१॥ अथ
विनायकादि पञ्चलोकपालानाम् ॥ ॐ गणनान्त्वेति प्रजापतिर्ऋषिर्गण-
पतिर्देवता यजुर्गणपतिप्रीतये जपे विनियोगः ॐ गणानान्त्वा० ..... वसोमम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽआहमजामि गर्भधमा त्वमजासि गर्भधम् ॥१॥ ॐ अम्बेऽअम्बिक० इति प्रजापतिर्ऋषिर्दुर्गा देवताऽनुष्टुप्छन्दो दुर्गाप्रीतये जपे विनियोगः। ॐ अम्बेऽअम्बिके०""वासिनीम्० ॥१॥ ॐ नियुत्वान्वायो, इति षण्णाम्, आद्याया गृत्समद ऋषिर्द्वितीयायाः पुरुमीढाऽजमीढौ ऋषीस्तिसृणां प्रजापतिर्ऋषिः षष्ठ्या बस्वाङ्गिरसऋषो वायुर्देवता द्वितीयाया अनुष्टुप्छन्दः पञ्चम्या स्त्रिष्टुप्छन्द शेषाणां गायत्र्यश्छन्दांसि वायुप्रीतये जपे विनियोगः ॥ ॐ नियुत्वान् वायो०""अवाऽ० स्य वृणीमहे ॥६॥ ॐ ऊर्ध्वाऽअस्येति द्वादशार्चानां प्रजापतिर्ऋषिरग्निर्देवता उष्णिक्छन्द आकाशप्रीतये जपे विनियोगः ॐ ऊर्ध्वाऽअस्य०--हविरिदं जुषन्ताम् ॥१२॥ ॐ यवां कशेति मेधातिथिर्ऋषिरश्विनौ देवते गायत्री छन्दोऽश्विनौ प्रीतये जपे विनियोगः। ॐ यवांकश०""""""""""॥१॥ अथ दिक्पालानाम् ॥ ॐ आशुः शिशान इति द्वादशर्चं. ऐन्द्रं वत ॥१२॥ अस्या जरास इति सप्त दशर्च

शिशान इति द्वादशर्च. पुन्द्र वत् ॥१२॥ अस्या जरास इति सप्त दशर्च

माग्नेयं प्राग्वत् ॥१७॥ यमायत्वेति दध्यङ्ङाथर्वण ऋषिर्यमो देवता यजुर् यमप्रीतये जपे विनियोगः ॥ ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा ॥१॥ ॐ असुन्वन्तमिति ॐ चस्य प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो निर्ऋति प्रीतये जपे विनियोगः । ॐ असुन्वन्तम यजमानं परिवेद विश्वतः ॥४॥ ॐ इमम्मे वरुणेति द्वयोः शुनः शेफ ऋषिर्वरुणो देवता गायत्री त्रिष्टुभौ छन्दसी वरुणप्रीतये जपे विनियोगः ॥ ॐ इमम्मे प्रमोषीः ॥२॥ ॐ आषाडं युत्सु० इति सौम्य चतुष्टयं प्राग्वत् ॥४॥ ॐ रुद्राय षट षष्ठिर्मन्त्राः ऐशानां प्राग्वत् ॥६६॥ ॐ नमोस्तु सर्पेभ्य० इति त्र्यृचमनन्तं प्राग्वत् ॥३॥ ॐ ब्रह्मयज्ञान-मिति प्रजापतिर्ऋषिरादित्या देवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ ब्रह्मयज्ञानम्० ॥१॥ अथ वस्वदिनाम् ॐ सुगाव इति देवा ऋषयो वसवो देवता स्त्रिष्टुप्छन्द वसुप्रीतये जपे विनियोगः ॥१॥ ॐ सुगाओ० ॥१॥ ॐ इमां गिर इति गृत्समद ऋषिरादित्यादेवता त्रिष्टुप्छन्द आदित्य प्रीतये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जपे विनियोगः । ॐ गिरः अह० सः ॥१॥ रुद्राध्यायो रौद्रः प्राग्वत् ॥६६॥ ॐ शुक्र ज्योतिश्चेति षण्णां० सप्तर्षय ऋषयो मरुतो देवता आद्या चतुर्थी चोष्णीक् पञ्चमी जगती शेषा गायत्र्यश्छन्दांसि मरुतां प्रीतये जपे विनियोगः ॥ ॐ शुक्रज्योतिश्च ॥६॥ ॐ आब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मदेवता यजुर्ब्रह्म प्रीतये जपे विनियोगः । ॐ आब्रह्मन्० ॥१॥ ॐ सहस्रशीर्षेति वैष्णवं प्राग्वत् ॥१६॥ ॐ रुद्राध्यायो रौद्रः प्राग्वत् ॥६६॥ ॐ विभ्राड् इति सप्तदशर्चमार्कं प्राग्वत् ॥१७॥ ॐ वनस्पते विड्वंग इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता त्रिष्टुप्छन्दो वनस्पतिप्रीतये जपे विनियोगः । ॐ वनस्पते विड्वंग ॥१॥ इति प्रधानदेवानां जपादिकम् ॥ इति ॥ तत उत्तरांग व्याहृति होमादि बर्हि होमान्तं च पूर्णाहुति पर्य्यन्तम् कुर्य्यात् । ॐ भूर्भुवः स्वरिति व्याहृतीनां प्रजापति ऋषिरग्निवायु सूर्य्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि प्रायश्चित्तहोमे विनियोगः ॐ भूः स्वाहा, इदमग्नये न मम, ॐ भुवः

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

स्वाहा, इदं वायवे न मम, ॐ स्वः स्वाहा, इदं सूर्य्याय, न मम ॥३॥ ॐ त्वन्नोऽअग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निवरुणौ देवते प्रायश्चित्त होमे विनियोगः ॥ ॐ त्वन्नोऽग्ने० स्वाहा, इदमग्निवरुणाभ्यां न मम ॥४॥ ॐ सत्वन्नोऽअग्ने० इति वामदेव ऋषि स्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ सत्वन्नोऽअग्ने० एधि स्वाहा, इदमग्निवरुणाभ्यां ॥५॥ ॐ ॐ अयाश्चाग्न इति प्रजापतिर्ऋषिर्गायत्री छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्ने स्थनभि शस्ति० स्वाहा इदमग्नये न मम॥६५॥ ॐ ये ते शतमिति शुनः शेफ ऋषिर्वरुण सवितृ विष्णुविश्वे देव मरुत् स्वर्का देवता जगती छन्दः प्रायश्चित्त होमे विनियोगः ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञिया पाशा वितता महान्तः ॥ तेभिर्न्नो अद्य सविता तद्विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा । इदं वरुणाय सचित्रे विष्णवे विश्वेभ्यो देवेभ्यो महद्भ्यः स्वर्केभ्यः ॥७॥ ॐ उदुत्तममिति शुनः शेफ ऋषिस्त्रिष्टुप्छन्दो

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

वरुणो देवता क्रमेण पाशान्मोचने विनियोगः ॐ उद्दुत्तमं० स्याम स्वाहा ॥ इदं वरुणाय न मम ॥८॥ ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः । ॐ जापतये स्वाहा, इदं प्रजा-- पतये न मम ॥ इति मनसा ॐ अग्नने स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम ॥ ततः संस्रवप्राशनम् ॥ ततो ब्रह्मणे पूर्णपात्रदानम् । तत्र ॐ तत्सत् इत्यादि देशकालौ स्मृत्वा अद्येह कृतैतन्नवग्रहशान्तिहोमादि कर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म प्रतिष्ठासाङ्गतासिद्धये, इदं पूर्णपात्रं प्रजापति दैवतं ब्रह्मणे तुभ्यमहं सम्प्रददे इति ॥ ततः सुमित्रिया न ऽ आ ऽ ओषधयः सन्तु, इति प्रणितोदकं शिरसि अभिषिञ्चेत् ॥ ॐ दुर्मित्रियास्तस्मै सन्तु यो ऽ स्मान् द्वेष्टि, इति प्रणीतापात्रम् ऐशान्यां न्युब्जीकुर्यात् ॥ ततः आस्तरण क्रमेण बर्हिरुत्थाप्य, आज्येनाभिघार्य होमयेत् ॥ ॐ देवागातुं विदोगातु-- मिति----मनसस्पति विराट् छन्दो वातो देवता बर्हिर्होमे विनियोगः ॥ ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवागातु विदोगातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञ ऽ० स्वाहा वातेधा स्वाहा इति बर्हिर्होमः ॥ ततो महाबलिः । माष--तण्डुल--कुंकुम रक्तवस्त्रम् सदीपम् सजलम्, क्षेत्रपालाय बलिं दद्यात् । ॐ क्षेत्रपालाय भूतप्रेत राक्षस शाकिनी डाकिनी वेतालादि परिवारयुताय, इमां बलिं समर्प--यामि, भो भो क्षेत्रपाल इमं बलिं गृहाण, मम यजमानस्य आयुः कर्त्ता क्षेमकर्त्ता वरदस्तुष्टिदः पुष्टिदो भव ॥ ब्राह्मणेन शूद्रेण चतुष्पथे विसर्जयेत् ॥ प्राक्षालित पाणिपाद आचार्य आचमेत् । प्रत्यङ् मुखा ब्राह्मणाः पूर्वमुखान्, यजमानादीन् अभिषिञ्चेयुः, ऐशान्यां स्थापित शान्तिकलशोदकेन । तत्र मन्त्राः पुराणोक्ताः । ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्म--विष्णु--महेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान् यमो वैनिर्ऋतिस्तथा ॥ वरुणः पवन--श्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणः सहिताः शेषा दिक्पालाः पान्तु ते

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

सदा ॥ कीर्तिर्लक्ष्मीर् धृतिर्मेधा पुष्टिः श्रद्धा क्रियामितिः ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कीर्तिश्च मातरः ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो बुध जीव सितार्कजाः ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसो गणाः ॥ अस्त्राणि सर्वशस्त्रा—,राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्य वयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ इति ॥ वेदोक्ता अभिषेचनमन्त्राः---ओं देवस्य त्वा० ॥ एवमभिषिच्य ॥

तत आचार्यः ऋत्विग्भ्यो दक्षिणादानम् गोदानादिकञ्च दद्यात् । तत्र प्रथमं भास्करप्रीतये कपिलागोदानाम् । आचार्यं सम्पूज्य, गाञ्च यथाविधिना सम्पूज्य, सकुश--कर्मपात्रोदकमादाय ॐ तत्सत् अद्येहेत्यादि देशकालौ-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

समुच्चार्य, कृतैतन्नवग्रहार्चनहोमादि ग्रह--यज्ञप्रतिष्ठासांगतासिद्धये इमां कपिलाधेनुं यथाशक्तिअलंकृतां रुद्रदेवत्याम् यथानाम गोत्राय शर्मणे ब्राह्मणाय सूर्य्यप्रीतये तुभ्यमहं सम्प्रददे । प्रार्थना, ॐ कपिले सर्वदेवानाम् पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ ततो दानप्रतिष्ठा, ॐ तत्सत् कृतैतत् कपिलागोदानप्रतिष्ठार्थम् इदं द्रव्यमित्यादि योजयेत् । ततः सोमप्रीतये शंखदानम् । ॐ तत्सत्० इत्यादि चंद्रमाप्रीतये शंखं समुद्र दैवतम् गोत्राय शर्मणे ब्राह्मणाय० इत्यादि । प्रार्थना--पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंगलम् ॥ विष्णुना विधृतो नित्यमत शांतिः प्रयच्छ मे ॥ तद्वत् भौमप्रीतये रक्तवर्ण वृषभदानम् । ॐ तत्सत्० इत्यादि संयोज्य, सम्प्रददे । प्रार्थना, धर्मस्त्वं वृषरूपेण ब्रह्मणा निर्मिता पुरा । अष्टमूर्त्तेरधिष्ठानस्त्वं च शान्तिं प्रयच्छ मे ॥३॥ बुधप्रतीये, हिरण्यद्रव्यदानम् ॐ तत्सत्, हिरण्यय--मग्निदैवतमित्यादि । प्रार्थना--हिरण्य गर्भ गर्भस्थम्० ॥४॥ बृहस्पतये

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

तत्प्रीतये, पीत वस्त्र युग्म दानम् ॐ तत्सत् इत्यादि । प्रार्थना--ॐ पीतवस्त्र-युगं यस्मात् वासुदेवस्य वल्लभम् ॥ प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छ मे ॥५॥ शुक्रप्रीतये, श्वेताश्वदानम्, ॐ तत्सत्० इत्यादि, शुक्रप्रीतये श्वेताश्वं यमदैवतम् सम्प्रददे । प्रार्थना--ॐ विष्णुस्त्वमश्वरूपेण यस्मादमृत-संभवः ॥ चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥६॥ ततः शनैश्चर-प्रीयते कृष्णवर्णा गोदानम् ॥ यथाविधिना गां सम्पूज्य ब्राह्मणं च ॐ तत्सत्० इत्यादि रुद्रदैवत्यां तुभ्यमहं सम्प्रददे, प्रार्थना--यस्मात्त्वं पृथिवी सर्वा धेनो केशव सन्निभा । सर्वपापहरा नित्यमतः शान्तिंप्रयच्छ मे ॥७॥ राहुप्रीतये लौहदानम्, देयं सम्पूज्य, ॐ तत्सत्० इत्यादि वाक्यं संयोज्य । प्रार्थना--यस्माद्दुर्गाणि कार्य्याणि त्वदाधारणि सर्वदा ॥ हे लौह धातुमूलोऽसि ततः शान्तिं प्रयच्छ मे ॥८॥ केतुप्रीतये कृष्णं छागदानम्, देयं संपूज्य, ॐ तत्सत् इत्यादि कृष्णछागम् अग्निदैवतम्, वाक्यं संयोज्य । प्रार्थना--ॐ यस्मात्त्वं सर्वयज्ञानामंगत्वेन व्यव-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

स्थितः ॥ यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥६॥ एवं न्यूनताधिक्येषु दक्षिणासु सूर्य्यदक्षिणासमानं द्रव्येण प्रपूरणीयम् । सर्वेभ्यो ब्राह्मणेभ्यो न्यूनता न स्यात् इति आचार्यं विना ॥ सुवर्णेन समाकार्य्या यजमानेन दक्षिणाः । सर्वेषामथवा गावो दातव्या हेमभूषिता । सुवर्णमथवादद्यात् गुरुर्वा येन तुष्यति ॥ ततो भूयसी दक्षिणा ॥ दक्षिणां पुरस्कृत्य, सम्पूजयेत्, ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्त पुण्यफलदमतः शान्तिं प्रयच्छ मे । ॐ तत्सत् ३ विष्णु र्विष्णु र्विष्णुः इत्यादि संकल्प्य, अद्येह ग्रह मखकर्मणः सांगतासिद्धयर्थं तत्कर्मकृद्भ्यः, आचार्य ऋत्विगादि वेदाध्यायिभ्यः नाना नामगोत्रेभ्य ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथा भागं विभज्य दातुमहमुत्सृजे, इति सर्वेभ्यो दक्षिणां दद्यात्, भोजन-संकल्पञ्च कुर्य्यात् ॥ ततः पूर्णाहुतिः । ॐ अद्येहेत्यादि कृतस्य नवग्रह होमादिकर्मणः परिपूर्णता सिद्धयर्थं पूर्णाहुतिम् होमयिष्ये । ॐ समुद्रादूर्भि० ॐ वायुनाम० ॐ चत्वा-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

रिश्मृंगा ॐ पुनस्त्वा० ॐ सप्तते० ॐ धामं ते० ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानर आजातमग्निम् । कविꣳ सम्राजमतिथिर्जनानामासन्न पात्रं जनयन्त देवाः स्वाहा । ॐ पूर्णा दर्वी परापत सुपूर्णा पुनरापत । विष्णवे विक्रिणावहा इष मूर्जꣳ० शतक्रतो ॐ स्वाहा, इति पूर्णाहुतिः ॥

ततोऽग्निं परिक्रमपूर्वकं सम्पूज्य स्रुवेण भस्म किञ्चिद्गृहीत्वा तिलकं कुर्य्यात्, ॐ त्र्यायुषञ्जमदग्ने० इति ललाटे, ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम्, ॐ यद्देवेषु त्र्यायुषम्, इति दक्षिणबाहुमूले, ॐ तन्नोऽअस्तु त्र्यायुषम्, इति हृदि, एवं तिलकं कृत्वा विसर्जनं कुर्यात् ॥ परिक्रमपूर्वकं सर्वान् पूजयेत् ॐ उत्तिष्ठ ब्रह्मणस्पते० ॐ यान्तु देवगणा सर्वे पूजामादाय पार्थिवीम् ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ अत्र घृतच्छायां निरीक्ष्य, आज्यमभिमन्त्र्य, दानं कुर्यात् । यत्र यजमानं सपरिवारं तिलकादिकं प्रसादाशिषवचनेनालंकुर्यात् आचार्यः । ततः कर्मणो न्यूनता-संसिद्ध्यर्थं श्रीविष्णुस्मरणम्,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः। ॐ विष्णुः ३ इति, स्मरणम्, यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ॐ अच्युताम नमः, अच्युताय नमः ॥ ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः, शुभम् भूयात्। इति ग्रहशान्तिविधिः।

अथ मातृका--पूजा--विधिर्लिख्यते

श्री गणेशाय नमः ॥ श्रीगुरवे नमः ॥ श्रीमातृदेवताभ्यो नमः ॥ कस्मिं कुले मंगलपंचकं च, कस्मिन् कुले मंगलसप्तकं स्यात् ॥ त्रिमंगलं चापि कुले विशुद्धो नोल्लङ्घीना कुलदेशधर्माः ॥१॥ मृत्तिका मंगला च षोडश--स्तम्भ मण्डपः ॥ रमणीयः पूर्वमुखः कदलीस्तोरणान्वितः। अथ प्रयोगा--रम्भः। सन्ध्याकाले प्रक्षालितकरचरणो यजमानः कुशहस्तः प्रथमं गोमय सप्तदश पुञ्जेषु पूजयेत्, ॐ अद्येहेत्यादि देशकालौ स्मृत्वा ममेप्सिता मुके--

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्टकाम संसिद्धये तत्प्रतिबन्ध दुरितोपसमनाय मृत्तिकामंगलत्वेन श्रीविनायक पूजन पूर्वकमादित्यादि सप्तदश गोमय मातृदेवपूजनमहङ्करिष्ये। तत आवाहनम्, ॐ कारस्य ब्रह्माऋषिर्दैवी गायत्री छन्दः परमात्माग्निर्देवता सर्व कर्मारम्भे विनियोगः। पुनश्च ॐ भूर्भुवः स्वरिति महाव्याहृतीनां जमदग्नि-भरद्वाज भृगव ऋषयोऽग्निवायुसूर्य्यो देवता दैवी, उष्णिग्दैवी बृहत्यश्छ-न्दांसि, गणपत्याद्यावाहने विनियोगः। ॐ गणनान्त्वेति०, ॐ भूर्भुवः स्वः गणपते, इहागच्छ, इह तिष्ठेत्यावाह्य, ॐ गणनान्त्वा० इति मन्त्रेण पञ्चोपचारैः सम्पूज्य वक्रतुण्डेति प्रार्थयेत्। ॐ वक्रतुण्ड महाकाय कोटिसूर्य्य समप्रभ, अविघ्नं कुरु मे देव सर्वकार्य्येषु सर्वदा ॥

मातृका पूजा

गणपतये धूप दीप नैवेद्यादिकं समर्पयेत्, ततः सप्त दश गोमय पिण्डेषु अक्षतं (शुक्लतण्डुलानि) संस्थाप्य प्रतिष्ठां कुर्यात्, ॐ मनो जूतिर्जुषता-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टम् यज्ञ ऽ० समिमन्दधातु ॥ विश्वेदेवा स ऽइहमादयन्तामों ऽ२ प्रतिष्ठ ॥१॥ ॐ भूर्भुवः स्वः आदित्यादि सप्तदश गोमय मातर इहागच्छत इह तिष्ठत इति प्रत्येकं पुञ्जेषु आवाहनम् । अदितिः देवमाता च स्वाहा सिद्धिः सरस्वती ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा–पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिरतोगोमय मातरः ॥ यथा ॐ अदितिरसि १, ॐ देवमातासि २, ॐ स्वाहासि ३, सिद्धिरसि ४, ॐ सरस्वत्यसि ५, ॐ कीर्तिरसि ६, ॐ लक्ष्मीरसि ७, ॐ धृतिर्रासि ८, ॐ मेधासि ९, ॐ तुष्टि–रसि १०, ॐ श्रद्धासि ११, ॐ क्रियासि १२, ॐ मतिरसि १३, ॐ बुद्धि–रसि १४, ॐ लज्जासि १५, ॐ वपुरसि १६, ॐ शान्तिरसि १७, इति प्रत्येकमावाह्य चतुर्थ्यन्तपदैर्मन्त्रै पञ्चोपचारैः आदित्यादि सप्तदश गोमय मातरः सम्पूजिता भवन्तु, स्वस्थानं गच्छत, इति पूजां सम्पाद्य–अत्र पूर्वा–चारेण विध्यनुसारेण स्त्रिभिर्मृत्तिकामंगलाचारविधानम् ॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

मातृका-पूजायाम्

अथ कलश-स्थापन-विधिः—ॐ भूरसीति भूमिशोधनम्, गोमयोप-लिप्ते भूमौ ॐ धान्यमसीति धान्यस्थापनम्, ॐ आजिघ्रकलशमिति अक्षतं कलशं संस्थाप्य—ॐ वरुणस्योत्तम्भनमसीति कलशे तीर्थादि जलं प्रक्षिपेत्, ॐ या ओषधिरिति सर्वौषधीः ॐ या फलीनि इति पूगीफलानि । ॐ हिरण्यगर्भेति पंचरत्नानि, ॐ यवोसीति यवान्, ॐ गन्धद्वारेति गन्धम्, ॐ काण्डात्काण्डादिति दूर्वा, ॐ अश्वत्थेवेति पञ्चपल्लवादीनि, ॐ बृहस्पत इति वस्त्रयुग्मेन कलशं वेष्टयेत्, ॐ तत्त्वायामीति मन्त्रेण वरुणमावाह्य पूजयेत् ॥ ततः कलशे गंगादितीर्थान्यावाहयेत्, ॐ सर्वे समुद्राः सरित-स्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥१॥ कलशं संस्पृश्य, ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूले । त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ त सागराः सप्त सप्त द्वीपा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः । अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततः प्रार्थना—ॐ देवदानवसम्वादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विष्णुना विधृतः स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवा सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । पूजयामि यथाशक्त्या प्रार्थयामि पुनः पुनः ॥ क्रियमाणेषु कार्येषु दुरितोपशमं कुरु ॥ ॐ कलशदेवाय नमः ॥ ततो दीपं प्रज्वाल्य, ॐ नमोस्त्वनन्ताय० इति गन्धपुष्पाक्षतैः सम्पूज्य । ततः कलशस्कन्धदेशे, गणपति–दुर्गा–वायु–आकाश–अश्विनीकुमारादीन् पूजयेत्, ॐ भूर्भुवः स्वरिति व्याहृतीनां जमदग्नि–भरद्वाज–भृगव ऋषयोऽग्निवायुसूर्या देवता, दैवी उष्णिग्दैवी बृहत्यश्छन्दांसि गणपत्याद्यावाहने विनियोगः । ॐ गणनान्त्वेति मन्त्रस्य प्रजापतिर्ऋषिर्यजु–

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

र्गणपतिर्देवता गणपतेरावाहनपूजनयोर्विनियोगः। ॐ गणनान्त्वेति आवाह-
नादिपञ्चोपचारैः सम्पूज्य। ततो दुर्गाम्। ॐ अम्बेऽअम्बिक० इति प्रजापति-
र्ऋषिर्दुर्गा देवताऽनुष्टुप् छन्दो दुर्गाऽऽवाहनपूजनयोर्विनियोगः। ॐ अम्बेऽ
अम्बिकेऽम्बालिकेनमानयति इति पञ्चोपचारैः पूजयेत्। ॐ वातो वेति
गन्धर्वा ऋषयो वातो देवता उष्णिग्छन्दो वाय्वावाहनपूजनयोर्विनियोगः॥ ॐ
वातोवेति पञ्चोपचारैर्वायुं पूजयेत्॥ ॐ ऊर्ध्वाऽअस्येति प्रजापतिर्ऋषि-
राकाशो देवता उष्णिक्छन्द आकाशावाहनपूजनयोर्विनियोगः। ॐ ऊर्ध्वा
ऽअस्य इति, ॐ आकाशाय नमः इति। ॐ अश्विनोर्भैषज्येनेति अश्विर्ऋषि-
रश्विनौ देवते, अश्विनीकुमारावाहनपूजनयोर्विनियोगः ॐ अश्विनोर्भैषज्येन०
इति पञ्चोपचारैः, ॐ अश्विनीकुमाराभ्यां नमः, इति कलशे पञ्चदेवान्
सम्पूजयेत्। ततः कुशासने समुपविश्य प्राङ्मुखः, तोरणमातृपूजां कुर्य्यात्,
ॐ अद्येहेत्यादि देशकालौ संस्मृत्य ममामुकाभीष्टकामप्रसिद्ध्यर्थं गौर्य्यादि

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

दशतोरणमातृपूजनमहं करिष्ये ॥ ॐ भूर्भुवः स्वः गौर्य्यादि दशतोरण-मातरः इहागच्छत इह तिष्ठत इत्यावाह्य अक्षतान् पुष्पाणि दत्त्वा स्थापयेत् पूजयेच्च ॥ ताश्च---ॐ गौरी च धनदा नन्दा मङ्गला विमला बला ॥ गंगा च यमुना धात्री विधात्री तोरणाम्बिका ॥ ॐ गौर्यसि १, ॐ धनदाऽसि २, ॐ नन्दाऽसि ३, ॐ मंगलाऽसि ४, ॐ विमलाऽसि ५, ॐ बलाऽसि ६, ॐ गंगाऽसि ७, ॐ यमुनाऽसि ८, ॐ धात्र्यसि ९, ॐ विधात्र्यसि १०, एवं चतुर्थ्यन्त-नाममन्त्रैः सम्पूजयेत् ।

ततो द्वार-मातृ-पूजा ॥ ॐ अद्येह देशकालमुच्चार्य, ममामुकाभीष्ट-कामप्रसिद्ध्यर्थं निर्विघ्नपरिसमाप्त्यर्थं च नन्दादि सप्तद्वारमातृपूजनमहं करिष्ये । ॐ भूर्भुवः स्वः, नन्दादि सप्त द्वारमातरः इहागच्छत, इह तिष्ठत, इत्यावाह्य, ताश्च---नन्दा नन्दिनी वासिष्ठी वसुदेवा च भार्गवी ॥ जया च विजया चैव सप्तैता द्वारमातरः ॥१॥ ॐ नन्दाऽसि १, नन्दिन्यसि २, ॐ

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

वासिष्ठ्यसि ३, ॐ वसुदेवाऽसि ४, ॐ मार्गव्यसि ५, ॐ जयाऽसि ६, ॐ विजयाऽसि ७, इति चतुर्थ्यन्तनाममन्त्रैः सम्पूजयेत् ॥

ततः गौर्य्यादि--षोडश--मातृपूजा ॥ ॐ अद्येहेत्यादि देशकालौ स्मृत्वा, अद्य कर्त्तव्यामुककर्म निर्विघ्नतया समाप्त्यर्थम् तदंगत्वेन गणेश--दुर्गा--सूर्य्या--दिनवग्रहान् गौर्य्यादिषोडशमातृः, ब्राह्म्यादि--सप्त--मातृः पूजनं चाहं करिष्ये ॥इति॥ ॐ गणनान्त्वेति गणपतिं सम्पूज्य सम्प्रार्थ्य, ॐ अम्बेऽअम्बिक इति दुर्गां सम्पूज्य सूर्य्यादिनवग्रहाँश्च तत्रैव कलशे सम्पूज्य, सम्प्रार्थ्य, धूपादिकं च विधाय । ततः प्रतिमासु भित्तौ पटे वा लिखितासु प्रतिमासु, अक्षतपुञ्जेषु च आवाह्य पूजयेत् । यथा--गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ॥ ॐ गौर्यसि १, ॐ पद्माऽसि २, ॐ शच्यसि

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

३, ॐ मेधाऽसि ४, ॐ सावित्र्यसि ५, ॐ विजयाऽसि ६, ॐ जयाऽसि ७, ॐ देवसेनाऽसि ८, ॐ स्वधाऽसि ९, ॐ स्वाहाऽसि १०, ॐ माताऽसि ११, ॐ लोकमाताऽसि १२, ॐ धृतिरसि १३, ॐ पुष्टिरसि १४, ॐ तुष्टिरसि १५, ॐ आत्मनः कुलदेवताऽसि १६, इति षोडश मातरः ॥ अथ ब्राह्म्यादि सप्त मातरः। ॐ ब्राह्म्यसि १, ॐ माहेश्वर्यसि २, ॐ कौमार्यसि ३, ॐ वैष्णव्यसि ४, ॐ वाराह्यसि ५, ॐ इन्द्राण्यसि ६, ॐ चामुण्डाऽसि ७ इति ॥ ॐ मनोजूतिरिति अक्षतपुञ्जेषु प्रतिष्ठाप्य, ॐ भूर्भुवः स्वः गौर्य्यादि षोडश मातरः, तथा ब्राह्म्यादि सप्त मातर इहागच्छन्तु, इह तिष्ठन्तु इत्यावाह्य पूजयेत्। ततः स्वाचारात् प्राप्तसपत्नीको यजमानः पक्वान्नं शिरसि निधाय वसोर्धारां प्रतीच्छेत् ॥ तत मन्त्राः ॥ ॐ वसो पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ॐ ता ऽ० सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

यामस्य कण्वोऽअदुहत् प्रपीना ऽ० सहस्रधारां पयसा महीङ्गाम्, इति ॥ कण्वो हेमां रददर्श साहमस्मै सरोधा सर्वान् कामान् दुदुहे । इति ॥ द्योः शान्ति रिति, पुनस्त्वेति च जपेत् ॥ प्रणमेत् । ॐ अच्युताय नमः ३ इति संस्मरेत् शुभम् । इति मातृका--पूजा ।

॥ अथ ॥

आभ्युदयिकश्राद्धविधिः

श्रीगणेशाय नमः ॥ आभ्युदयिकश्राद्धे--ऽावाहनं स्वधा शब्द पिण्डाग्नौ-करणं तथा ॥ विकरं पिण्डदानञ्च सांकल्पं षट् विवर्जयेत् ॥१॥ सांकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ॥ मात्स्ये ॥ उत्सवानन्दसन्तानयज्ञोद्वाहादि-मंगले ॥ मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ॥ ततो मातामहनां च विश्वेदेवाँस्तथैव च ॥ पूर्वाह्णे दैविकं कार्य्यमपराह्णे तु पैतृकम् ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ अत्राभ्युदयिके युग्मा ब्राह्मणाः । अमूला

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दर्भाः । प्राङ्मुखेभ्यः उदङ्मुखः, उदङ्मुखेभ्यो वा प्राङ्मुखः ॥ द्वौ दर्भौ पवित्रे कात्यायनः ॥ दधि-वदराक्षतमिश्रम् पिण्डार्थम् उपकल्प्यम् । अर्घदाने विशेषः । अपसव्यकरण-पितृतीर्थयोर्निषेधोऽपि ॥ गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यनिवेदयेत् ॥ नात्रापसव्यकरणं न पितृतीर्थमिष्यते ॥ पात्राणां पूरणादीनि दैवेनैव तु कारयेत् ॥ निमन्त्रणे प्रतिज्ञायामन्नव्यासनयोस्तथा ॥ एषु षष्ठी प्रयोक्तव्या श्राद्धप्रकरणे बुधैः ॥ अन्नव्यासनयोः षष्ठी द्वितीयावाहने तथा ॥ अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृताः ॥ अथ प्रयोगः ॥ तत्र कर्त्ता प्रक्षालितपाणिपादाचान्तः प्राङ्मुख उदङ्मुखो वा दीपं प्रज्वाल्य सम्पूज्य । ॐ यद्वेवेति कण्डिकात्रयेण कर्मपात्रं पुरस्कृत्य, तत्र शन्नो देवीरिति जलम् । ॐ पवित्रेस्थ इति कुशान् । ॐ तिलोसीति तिलान् । ॐ यवोसीति यवान् । ॐ गन्धद्वारामिति गन्धम् । अक्षन्नमीमद तेति अक्षतान् । ॐ श्रीश्चतेति पुष्पाणि । एवं निर्माय, तत्कर्मपात्रोदकमादाय—

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ॐअपवित्रः पवित्रो वा० ॐ पुण्डरीकाक्षः पुनातु, इत्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं च सिञ्चेत्, तत्कुशादिकमादाय, ॐ अद्यामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथाऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकाऽमुकाऽमुकशर्मणां नान्दीमुखानां तथाऽमुकगोत्राणामस्मन्मातामह---प्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां वसुसत्यसंज्ञकविश्वेदेवपूर्वकाणाममकर्माङ्गतया, आभ्युदयिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये, इति ॥ ततः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमोनमः । इति त्रिर्जपेत् । ततो दिग्बन्धनं कुर्य्यात् । हस्ते यवकुशानादाय---ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । अपहता असुरा रक्षा ऽ० सि वेदिषदः । ॐ तथा बर्हिषदः पातु याम्यां ये पितरः स्थिताः । ॐ अपहता असुरा रक्षा ऽ० सि वेदिषदः । प्रतीचिमाज्यपास्तद्वत्, ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपहता असुरा रक्षा ऽ० सि वेदिषदः । ॐ उदीचिमपि सोमपाः ॐ अपहता असुरा रक्षा ऽ० सि वेदिषदः । ॐ ऊर्ध्वतस्त्वर्यमा रक्षेत् कव्यवाडनलोऽप्यधः, ॐ अपहता असुरा रक्षा ऽ० सि वेदिषदः । ॐ रक्षोभूतपिशाचेभ्योस्तथैवाऽसुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ इति यवान् विकिरेत् ॥ नीवीबन्धनम् । ॐत्वमग्ने द्युभिस्त्वमशुशुक्षणि त्वमद्भ्यस्त्वंमस्मनस्परि ॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वन्नृपते जायसे शुचिरिति मन्त्रेण नीवीबन्धनम् ॥ अथाऽऽसनम् ॥ ॐअद्येहाऽऽभ्युदयिकश्राद्धे अमुकगोत्राणामस्मन्मातृ पितामहीप्रपितामहीनाममुकाऽमुकामुकदेवीनां नान्दीमुखीनां तथाऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथाऽमुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकाऽमुकशर्मणां सपत्नीकानां नान्दीमुखानां श्राद्धसम्बन्धिनां वसु-सत्यसंज्ञकविश्वेषां देवानामिदमासनं वो नमः ॥ ॐ अद्येहाऽमुकगोत्राया मातुरमुकदेव्याः नान्दीमुख्या आभ्युदयिक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्राद्धे इदमासनं ते नमः ॥ एवमेव पितामही–प्रपितामहीभ्यां दद्यात् । ॐ अद्येहामुकगोत्रस्याऽस्मन्मातामहस्यामुकशर्मणो–नान्दीमुखस्याऽऽभ्युदयिक श्राद्धे, इदमासनं ते नमः । एवं प्रमातामह–वृद्धप्रमातामहाभ्यां दद्यात् ॥ ऋज्वमूलकुशरूपमासनं सर्वेभ्यो दत्त्वा, गन्धाक्षतपुष्पताम्बूलवस्त्रादिभिः समभ्यर्च्य धूपदीपनैवेद्यद्रव्यादिकं च दद्यात् । कुशयवजलान्यादाय----ॐ अद्याभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातृपितामही-प्रपितामहीनाममुकामुकाऽमुकदेवीनां नान्दीमुखीनां तथा अद्याऽऽभ्युदयिकश्राद्धेऽऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथाऽऽभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातामह–प्रमातामह--वृद्धप्रमातामहानाममुकाऽमुकाऽमुकशर्मणां नान्दीमुखानां श्राद्धसम्बन्धिनो वसुसत्यसंज्ञकविश्वेदेवा एतानि अर्चनविधौ गन्धपुष्पाक्षत--धूपदीपनैवेद्यताम्बूल द्रव्ययज्ञोपवीत--वस्त्राणि वो नमः ॥ ॐ अद्यामुकगोत्राऽस्मन्मातरमुकदेवि नान्दीमुखि,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आभ्युदयिकश्राद्धे एतानि अर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूल--यज्ञोपवीत--द्रव्यवासांसि ते नमः । एवं पितामही--प्रपितामहीभ्यां दद्यात् । ॐ अद्यामुकगोत्राऽस्मन्मातामहामुकशर्मन्नान्दीमुखाऽऽभ्युदयिकश्राद्धे, एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीप--नैवेद्य--ताम्बूल--यज्ञोपवीतवासांसि ते नमः ॥ एवं प्रमातामह--वृद्धप्रमातामहाभ्यां दद्यात् ॥ अथ भूस्वामी ॥ यव-कुशोदकमादाय----ॐ इदमामान्नमेतद् भूस्वामिपितृभ्यो नमः ॥ ततः अन्नसंकल्पं कुर्य्यात् । तत्र प्रथमं विश्वेदेवान्नपात्रमुत्तानाभ्यां पाणिभ्या--मालभ्य----ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमि स्वाहा, इति पठित्वा, ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढ--मस्यपा ऽ० सुरे स्वाहा कृष्णकव्यमिदं रक्षमदीयमिति पठेत् । ॐ इदमन्नम्, ॐ इमा आपः, ॐ इदमाज्यम्, ॐ इदं हविः । एतान्युपकरणानि, इति दक्षिणाङ्गुष्ठं निवेश्य ॥ ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातिरिति यवान्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकीर्य कुशोदकमादाय----ॐ अद्याऽऽभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातृ-पितामही-प्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथाऽऽभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथाऽऽभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकाशर्मणां नान्दीमुखानां श्राद्धसम्बन्धिभ्यो वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं सजलं सोपस्करं वो नमः ॥ पूर्ववत्पात्रालंभनादिकं कृत्वा—ॐ अद्यामुकगोत्रायै, अस्मन्मात्रेऽमुकदेव्यै नान्दीमुख्यै आभ्युदयिकश्राद्धे, इदमन्नं सजलं सोपस्करं ते नमः ॥ एवं पितामही-प्रपितामहीभ्यां दद्यात् । ततः पात्रालम्भनं पूर्ववत्--ॐ अद्यामुकगोत्रायाऽस्मत्पित्रेऽमुकशर्मणे नान्दीमुखायाऽऽभ्युदयिकश्राद्धे, इदमन्नं सजलं सोपस्करं ते नमः ॥ एवं पितामह-प्रपितामहाभ्यां दद्यात् ॥ पात्रालम्भनादिकं पूर्ववत् ॥ ॐ अद्याऽमुकगोत्रायाऽस्मन्मातामहायाऽमुकशर्मणे नान्दीमुखायाऽऽभ्युदयिकश्राद्धे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमन्नं सजलं सोपस्करं ते नमः । एवं प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात् ॥ ततः----अन्नहीनं क्रियाहीनं विधिहीनं च यद् भवेत् । तत्सर्वमच्छिद्रमस्तु श्रीभास्करप्रसादतः । ॐ नमस्तुभ्यमिति पठेत् । ततो गायत्रीं जपेत् ॥ ॐ मधुवातेति ऋचं पठेत् । ॐ मधु इति त्रिः पठित्वा पुरुषसूक्तादिकं च पठेत् ॥ ततः प्रागग्रकुशायां भूमौ कुशयवजलान्यादाय--असंस्कृतेति मन्त्रं पठित्वा, आस्तृतकुशत्रयोपरि भूमौ उत्सृजेत् । ॐ अग्निदग्धाश्चये जीवा० इति कुशासनोपरि तदन्नं विकिरेत् । ततः आचम्य हरिं स्मृत्वा ॥ ॐ संप्रोक्षितमस्तु ॥ ॐ शिवा आपः सन्तु । ॐ सौमनस्यमस्तु । ॐ अक्षतं चारिष्टमस्तु । ब्राह्मणपात्रेषु निक्षिप्य ॥ सजलकुशत्रयमादाय अक्षय्योदकम् । ॐ अद्यामुकगोत्राऽस्मन्माताऽमुकदेवी नान्दीमुख्याभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् ॥ एवं पितामही-प्रपितामहीभ्याम् दद्यात् । ॐ अद्यामुकगोत्रोऽस्मत्पिता, अमुकशर्मा नान्दीमुख आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं पितामह–प्रपितामहाभ्याम् । ॐ अद्याऽमुकगोत्रोऽस्मन्मातामहोऽमुक–शर्मा नान्दीमुख आभ्युदयिकश्राद्धे दत्तैतदन्नधनादिभिः प्रीयताम् । एवं प्रमातामह–वृद्धप्रमातामहाभ्याम् । ततः प्राङ्मुखोऽञ्जलिं बद्ध्वाऽऽशिषः प्रार्थयेत् । ॐ गोत्रन्नोवर्द्धताम् ॐ वर्द्धताम् । ॐ दातारो नोऽभिवर्द्धन्ताम् । ॐवर्द्धन्ताम् । ॐवेदाः सन्ततिरेव च । ॐसन्तु । ॐश्रद्धा च नो मा व्यगमत् । ॐमाऽगात् । ॐ बहुदेयं च नोऽस्तु । ॐ अस्तु । ॐ अन्नं च नो बहु भवेत् । ॐ भवतु । ॐ अतिथींश्च लभेमहि । ॐ लभध्वम् । ॐ याचितारश्च नः सन्तु । ॐ सन्तु । ॐ मा याचिष्म कंचन । ॐ मा याचेथाः । ॐ एताः सत्या आशिषः सन्तु । ॐ सन्तु ॥ ततः श्राद्धकर्त्ता ब्राह्मणहस्तेन तिलकं कुर्य्यात् ॥ अथ दक्षिणादानम् । ॐ अद्यामुकगोत्राणामस्मन्मातृपितामहीप्रपि–तामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां, तथा ॐ अद्यामुकगोत्राणाम–स्मत्पितृपितामह–प्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां, तथा

CC-0. Nepal Sanskrit Academy. Kathmandu Collection